प्रतापरुद्रनाटकलक्षणप्रारंभः

श्रीगणेशाय नमः॥ विद्याकैरवकौमुदीं श्रुतिशिरःसीमंतमुक्तामणिं दारान् पद्मभुवस्त्रिलोकजननीं वंदे गिरां देव
तां॥ यस्याः सा बुधनमस्कृया स्तुहरति नांसारस्वतप्रक्रियाबीजंन्यासस्तु वोऽस्त्ववंतिकविता नाट्येकजीवातवः॥ पूर्वेभ्यो
भामहादिभ्यः सादरं विहितांजलिः॥ वक्ष्ये सम्यगलंकारशास्त्रसर्वस्वसंग्रहं॥ चिरेण चरितार्थोऽस्तु काव्यालंका
रसंग्रहः॥ प्रतापरुद्रदेवस्य कीर्तिर्येन वि प्रकाश्यते॥ रसप्रधानाः शब्दार्थगुणालंकारवृत्तयः॥ रीतयश्चेति
शास्त्रेऽस्मिन् प्रमेयं काव्यपद्धतिः॥ यद्यप्यसौ प्रबंधेषु प्राचां समस्तु निरूपिता॥ एतस्याः सदृशं किंतु नोदाहरण
माहृतं॥ पुण्यश्लोकस्य चरितमुदाहरणमर्हति॥ न कुत्रि[illegible] दृष्टं पूर्वैः प्रबंधाभरणीकृतं॥ प्रबंधानां प्रबंध्द ता
णां मयि विश्रांतिप्रतिष्ठयोः॥ मूलं विषयस्तु तस्य नेतुर्गुणनिरूपणं॥ यथा रामगुणवर्णनेन रामायणं वल्मीकजन्म
नोः॥ महाप्रतिष्ठाकारणं महापुरुषवर्णनेन हि श्रेयस्करी प्रबंधस्थितिः॥ यथा वेदशास्त्रपुराणादिर्हितप्राप्तिर ध
हितनिवृत्तिश्च॥ तथा सदाश्रया काव्यादपि॥ इयान् विशेषः काव्ये कर्तव्यताधीः सरसान्यत्र न तथा॥ यद्वेदा
२ त् प्रभुसम्मितादधिगतं शब्दप्रधानाच्चिरं यच्चार्थप्रवणात्पुराणवचनादिष्टं सुहृत्सम्मितात्॥ कांतास
म्मिततया यया सरसतामापाद्य काव्यश्रिया कर्तव्ये कुतुकी बुधो विरचितां तस्यै स्पृहां कुर्म्महे॥ अतः काव्यं दृ
ष्टादृष्ट[illegible]लं जनकतयाव बहु वयुक्तं॥ तथा चोक्तं काव्यप्रकाशे॥ काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये॥
प सद्यः परनिर्वृतये कान्तासम्मिततयोपदेशयुजे॥ प्रसिद्धं चैतन्महाप्रबंधेषु॥ परिवृढ[illegible]विषणापीसंप्लाव ड
इवासौ विसर्पति गुणाः॥ स्तुवंतु सुपुरु[illegible] चरित्रं वितन्[illegible]मान हरंति कं वा लापाः॥ परिवर्धते विज्ञानं संभाव्यते य
शो विसर्पति गुणाः॥ श्रूयंते सुपुरुषमननइतिशेषः॥ यत्र पुनरुत्तमचरितं निबध्यते तत्सुरसं काव्यमेव॥ न
तन्मूला च श्रुतिस्मृतिः॥ काव्यालापांश्च वर्जयेदिति॥ न केवलं काव्यजातस्यायं पंथा॥ शास्त्रजातस्यापि १

चरितं किं तद्येन न हरंति काव्यालापाः१ ज़ु

महार्लोकादरः॥ यथा वैशेषिकादेरीश्वरप्रतिष्ठापकतया जगत्सु ख्यातता॥ महाभारतादीनामपि॥ महापुरुषकु
णवर्णनपरतया विश्वातिशायित्वं किमत्र बहुना वेदांता अपि ब्रह्मप्रतिपादकतयैव परमुत्कृष्यंते॥ अथातो
धर्मजिज्ञासेत्युपक्रमप्रमाणेन सूत्रकृतां महर्षीणामपि पुरुषाश्रितस्य गुणात्रेष्ठस्य धर्मस्य जिज्ञासादरो म
२४ हापुरुषवर्णने शास्त्रप्रामाण्यं स्फुटीकृतं॥ तत्तन्न्यायनिरूपणपरस्यापि प्रबंधराशेर्महापुरुषवर्णनं
महिम्नः परमामोदजनकं प्रतापरुद्रस्य गुणान् पुण्यानाश्रित्य निर्मितः॥ अलंकारप्रबंधोयं सतां कर्णो
त्सवेस्तु वः॥ काकतीयनरेंद्रस्य यशो प्रवर्धयितुं कृता॥ विद्यानाथकृतिश्चेयं स्वयं तेन विपक्ष्यते॥ स्रलेवप्र
तीपाद्यमहिम्ना प्रबंधमहत्ता॥ तदुक्तं प्राचा भामहेन॥ उपश्लोक्यस्य माहात्म्यादुज्ज्वलाः काव्यसंपदिति
प्रतिपादितं भट्टोद्भटेन॥ गुणालंकारचारुत्वयुतमप्यधिकोज्ज्वलं॥ काव्यमाश्रयसंपत्त्या मेरुणेवामरद्रु
मइति॥ रुद्रभटेनापि कथितं॥ उदारचरितनिबंधनो बंधः [illegible] प्रतिष्ठेति॥ प्रपंचितं साहित्यमीमांसायां॥)
नायकमुपाश्रिता स्तुतिस्त्रजस्य इति नामाकल्पमाकल्पयतीति॥ दक्षिणोक्तेः॥ आदिराजयशोबिंब
मादर्शप्राशस्त्यं॥ तेषामसंनिधानेपि स्वयं पश्यन्नपश्यति॥ निरूढं च भोजराजेन॥ कवे ह्यापि वोद्ध ग्व
तिर्वि[illegible]कर्णावतंसकेति॥ नायकोयदि ज्ञायेत लोकोत्तरगुणाश्रयः॥ तत्रैव ते नायकगुणाः॥ महा
कुलीनतौज्ज्वल्यं महाभाग्यमुदारता॥ तेजस्वित्वं विदग्धत्वं धार्मिकत्वादयो मताः॥ पूर्वशास्त्रानुसारेण
कतिचित्कथिता मया॥ प्रतापरुद्रदेवस्य गुणा वा[illegible]ने वामगोचराः॥ अथैषां स्वरूपमुदाहरणं च॥ महा
कुलीनतानाम कुले महति संभवः॥ यथा॥ तादृक्मध्यमलोकभाग्यविभवैरिंदादिवंदारकैः सोढ्यं कौंडिलु

ज

भिक्षुभिश्चिरतरं संप्रार्थितः पद्मसद्मः अयमैंदुकुलप्रदीपः हस्तिनसदैर्धकाकतीयान्वयं तस्मिन्नस्य प्रति श्रीरुद्रदेव
षाज्जागर्त्ति लक्ष्मीपतिः ।। अथौज्ज्वल्यं । रूपसंपन्नदेहत्वमौज्ज्वल्यं परिकीर्त्यते । यथा ।। मुरारेः यः पंकजलनिधि
सुतायामुदपादि वन्महादेवाज्ज्ञातः स पुनररुद्रं वनीभर्तुर्हि तरि । वपुष्मान्त्र कामोयं जयति जगतीभाग्यविभवैः
प्रतापश्रीरुद्रः स्वयमिति मनीषा मम गदद्भृशं ।। अथ महाभाग्यं । निखिलक्षत्राधिपत्यं प्रभुत्वं महाभाग्यमुच्यते ।। य
था ।। सेवानम्रनरेंद्रमौलिविलसद्रत्नांशुनीराजितं राज्यश्री प्रथमावतारपदवीमारूढस्सिंहासनं ।। क्षोणी
रुद्र दिव्यं तिविक्रमैरनुपमैः प्रत्यर्थिपृथ्वीपतिस्त्वेमोषुध्वनजो बिभ्रे गुणनिधिः श्रीवीररुद्रो नृपः ।। अथौदार्यं ।।
यदिच्छां दानलाधिक्यमौदार्यं तन्निगद्यते । यथा ।। वदान्योनान्योस्ति त्रिजगति समो रुद्रनृपतेर्गुणश्रेणी
८८ श्लाघा यदि हि लहरी दोशानयशास्ता । समंताद्दुग्धैर्दूरं दृमगंधैः सुरभयः क्रियंते प्राकणभुवः ।। अथ
तेजस्विता । जगत्सकाराक्लेयं तं तेजस्वित्वं लट्टुच्यते ।। सद्यातेजौभानौ स्फुरति जयिनः काकतिविभोर
ति रिक्ताभ्रं स्कालाधिकुर्वंभिराहं इति मुखि । प्रकाशो व्युत्पत्तिः सर्वत्रजर दाम तमसामस्तयं पद्मानाम्
धिगिरिप मत्रास्य ह वदा । चिरंभवता ।। बुद्ध वस्तुषु चातुर्यं वैदग्ध्यं परिकीर्त्यते ।। यथा ।। चातुर्यं क्रिमुवर्ण्यं
ते गुणनिधेः श्रीवीररुद्रप्रभोर्यत्रान्योन्यविरुद्धयोरपि महद्वाणी श्रियो राजते ।। किंचाभ्यां सदृशोप
चारललितां तत्ताददृशे रसैर्वर्नि: सापत्न्यमिमां भुवंसन्नपतिर्धत्ते दिशां जित्वरः ।। अथ धार्मिकत्वं ।। ध
र्मैकायत्तवृत्तित्वं धार्मिकत्वमुदीर्यते ।। यथा ।। पारिहासेप्यनोचित्यं स्वप्नेप्यन्यवधूकथां ।। शास्त्रावप्यगु
णारोपं काकतिर्नमन्यते ।। आदिशब्दान्नीतिमत्वपारिसादयः ।। तन्महानिहि महिमत्वं स्याद्यापुनर्द्देवता २

हृ

मता॥ कौशल्यासीत्प्रथमजननी देवकी च द्वितीया विश्वोर्माता लदनुमहिता मुप्पडांबा तृतीया। यस्त्रेतायां रघुपतिर
भूद्द्वापरे शौरिरासीत् त्रातुं सोपि क्षितिं जयति काकतीवीररुद्रावतारः॥ ॥इति गरुडध्वजालंकृतया महामहिमनोक्तं॥ अथ यं
दिसं॥ सर्वविद्याधिकत्वं यस्मिन्नुदाहृतं। यशोगोष्ठीभि परितोषयन्बुधजनान् षड्दर्शनीसीमभिः सत्सत्प
गो खतमार्गदर्शन चतैः सूक्तैः कवीन्द्रं प्रीणयन्॥ संगीतोपनिषद्रहस्यविभुनेरालोच्ययोग्यक्रमे न्वन्सुसंसदि वेत्ति धि
कान्विहरते श्रीवीररुद्रो नृपः॥ अथ नायकगुणनिरूपणानंतरं नायकस्वरूपं निरूप्यते। यशःप्रताप स्तगो सु
धर्मकामार्थतत्परः॥ धुरंधरो गुणाढ्यश्च नायकः परिकीर्तितः॥ यशःप्रताभ्यां तु सतगल्भ्यं यथा। धर्मालंबसमु
द्भूतां त्रिभुवनस्यैकातपत्रश्रियं धत्ते काकतिवीररुद्रनृपतेः स्फारं यशोमंडलं। छायेवास्य नृपस्य लीकुवलय
क श्यामैयमा लो ते तन्मन्ये निपतत्प्रतापतपनस्तस्योपरि द्योतते। धर्मकामार्थपरत्वं। धर्मोयं इव पूर्णश्रीरर्थोध
र्म इव स्थितः॥ कामस्ताविवलोकामइव रुद्रनरेश्वरे। धुरीणता यथा। गायत्रीरनुमोदते निजवधूं रः कं
पनेन लें लोकं प्राणयते ध्रुवकपपतिर्वेसस्थली दशानात्। दिग्नागास्त्र करेणुका चमपाकुर्वन्वत्सनुव्र
ज्यया दोष्णा काकतिवीररुद्रनृपतौ विश्वंभरां बिभ्रति। गुणाढ्यत्वं यथा॥ मुखैः सहस्रं फणिवंद्रो लेल्कर्णः रोग
सहस्रेण लिखे दिवस्वान्॥ नेत्रैः सहस्रेण हरिश्च पश्येत्स्थाने गुणान्काकतिवीरभर्तुः॥ अथ नायकवि
शेषानिरूप्यंते॥ उदात्तोद्धतश्चैव ललितः शांत इत्यपि॥ वीरपूर्वाइमे पूर्वैश्चतुरो नायकाः स्मृताः॥ त
त्र सर्वरससाधारणाश्चत्वारो नायकाः॥ वीरोदात्त वीरोद्धतवीरललितधीरशान्ताः॥ एषां स्वरूपमु
दाहरणं च॥ महासत्वोतिगंभीरः क्षमावानविकत्थनः॥ प्रतापरुद्रवत् धीरोदात्तः स सम्मतः॥ यथा

चैव१

संदिग्धे रूपयाद्रुक्षणमपि हं त्वं धृतासि: पुनः शौर्ये श्री प्रविशांलिषु विनिमयन् फुल्लं जलतेवं दिषु। आकारा
नुसुखशेष हर्षे विश्रुना चक्रे त्वं धत्ते मनाकू त्रैलोक्यातिशायस्फूर्त्ति विपक्षव श्रीवीररुद्रो नृपः। दर्पमात्स
र्यभूयिष्ठस्त्रं इद्वृत्ति विकत्थनः॥ मायावी सुलभक्रोधः सधीरोद्धत उच्यते। रेरे गुर्जर जर्जरोसि समरे
लंपाक किं कंपसे वंग त्वं गलसि किं मुधा बलरक्तः का णोसि किं कोकुण। हूण प्राणपरायणो भव महाराष्ट्रापरा
ध्यस्य नीयो हरो वयमि चरतिनृ परिक्षवं साध्वस्मा भद्र टा॥ ॥ अत्र नटानां वीरोदात्तत्वं॥ ॥ निश्चिंतो धी
रे ललितः कलासक्तः सुखेकभूः॥ यथा। शौर्योष्मा निरवग्रहः प्रतिनृपाः सर्वेपि नम्रीकृता पातिप्रय
मुर्वेति प्रियमयं नाप्यः स्वयं क्रमीवः। धीरे यं युवराज एष महति श्रीवीररुद्रे धुरं सर्वां नित्यनुमोद
ते प्रतिकृलं श्रीकाकती द्रोविषु॥ धीरः शांतः प्रसन्नात्माधीररूशांतो द्विजादिकः। यथा। वीररुद्रनृपा
लरत्नमंत्रितः प्राप्तोदयं मोदते संख्यावदूणएष दक्षणामिवप्रयक्षमलाकरः। उन्मीलकमलश्रविहा
रवसतिर्फुल्लाविहारे निर्जेर्विश्वामोदमुदंचयन्नविरतं दोषावसानोत्सुकः। अत्र विप्राणां धीरशांत
त्वं। अथ शृंगार सविषयाश्चत्वारो नायकाः। अनुकूलो दक्षिणश्च शठो धृष्ट इति स्मृताः॥ एषांस्व
रूपमुदाहरणं। तत्र एकायत्तोनुकूलः स्यात्। एकस्यां नायिकायां विशेषानुरक्तोनुकूलनायकः॥ य
था। किं नामाचरितं तपस्सखि पुरा वायस्याः पतिर्भिपते वीररुद्रनृपः हूनतस्तु चरितं तस्यां प्रियाया
तव। जाने मानिनि मास्म विषीद पुरतः प्रख्याप्यरीणांस्थिरा हारंरत्नाकरमेखलां त्वयि समासक्तं वि
धास्ये नृपं। अत्र प्रतापरुद्रस्य सोण्यां विशेषानुरागो व्यज्यते। येन वध्वा स्थिरारत्नाकरमेखलेति ३

स्नेहप्रख्यापनं क्रियते॥ तुल्योनेकत्र दक्षिणः॥ अनेकासु नायिकासु वैषम्येस स्नेहानुवर्त्तो दक्षिणनायकः॥
यथा॥ निर्मोके न निमंत्रिता नरकलोके लोषु काचिन्मया सांतस्येन विलोकनेन हृदयं कस्येचिदाविस्कृतं॥ कस्यचि
त्सहितः प्रसाधनविधिर्द्दीनीकरेण ध्रुवा गन्नास्मी स्यनुचिं तयेव नृपतेरासीत्स भातान्निशा॥ यथा च॥ वाणीं
मुखेन वेत्रास्यां प्रियं दोष्णा च मेदिनीं॥ मानयन तुल्यता धत्ते तासु रुद्र नरेश्वरः॥ व्यक्तापराधे गतभीः सुध
ष्ट इति कथ्यते॥ राज्यश्री परिभोग दांसिप्रवत्तः संबोगमालोक्य ते वकृत्तत्राविनयोक्तिसा हसस्मि[illegible]दं तन्नाम
मयप्यर्पते॥ जानेत्वां बहुवल्लभं किमपरं वक्तव्यमस्या वयं तस्यां प्रेमतवाधिकं वसुमतीयन्नाम मकिं ज
ल्पिते॥ गूढविप्रियकृच्छठः॥ नायिकामात्रे विदितविप्रियकारी शठनायकः॥ यथा॥ दृष्ट्वा पश्यसि केवलं नम
नसा वाचा प्रियं भाषसे नो भावेन भुजांतरं प्रकटयस्यग्रे न चान्यं तरं॥ जातं काकुतिनाथफस्त्तव परं प्रा
णेश्वरी ध्यायतो माद्दक्षेषु विडंबनैव न दलं व्यर्थैव हि स्रुग्भ्रमैः॥ अत्र तत्तन्नायकपरतया काकूतीश्वरा
णामुदाहरणेन वीररुद्रस्यैव वर्णनं॥ एषां नायकानामनुकूलनैपीठमर्दकविटचेटविदूषकाः सहायाः॥ किं
चिद्गुनः पीठमर्द्द इदंकविशेषो विटः स्मृतः॥ संधानकुशलश्चेटो हास्यकारी विदूषकः॥ स्पष्टमेषामुदाहरणं॥
अष्टविधाः शृंगारनायिकाः॥ स्वाधीनपतिका चैव तथा वासकसज्जिका॥ विरहोत्कंठिता चैव विप्रल
ब्धा च खंडिता॥ कलहांतरिता चैव तथा प्रोषितभर्तृका॥ तथाभिसारिका चेति क्रमाल्लक्षणमुच्यते॥
प्रियोपलालिता नित्यं स्वाधीनपतिका मता॥ यथा॥ प्रियां सर्वां सहांते स्तैपि ज्ञोषि तप लालयन्॥ प्रता
परुद्रनृपतिः प्रतिक्षणमवेक्ष्यते॥ प्रियागमनवेलायां मंडयंती मुहुर्मुहुः॥ केलिगृहं तथात्मानं सा

स्याद्वासकसज्जिका॥ स्वतेजसापरिस्फुरत्प्रधानागारमुल्लया। क्रियाभिषेकवेलायांवीररुद्रःप्रतीक्ष्यते। चिरायस्य
ध्यिकंकांतेविरहोत्कंठितोन्मनाः॥ यथा। नर्मांकान्यालोङ्कृगुरुकपरिमलेरुद्रनृपतौकृपयावागोष्ठ्या स्थेचिरय
तिसखिविभिर्नैस्तुलप्तः॥ समानेनक्रांतंप्रजमदनबद्धांजलिरणपतौविम्बग्रीवः किरतिकिरणंतल्पि
यस्स्वःकुचिन्नसंकेतनावेषदयितेनाथवंचिता। स्मेरांलोलिविमलब्ध्वेतिकलाविद्भिःप्रकीर्त्यते॥ गुरुत्वे
सखिकाप्रेष्यागमकथाप्रातोनिरोधः परंसंकेतालयमनोप्यसेममुधाजातोम्बुभिःपंकिलः॥ यद्दारुड
नरेश्वरेप्रियतमेराज्यश्रियोवल्लभेकारस्याधिपतिनायकेकृतपदप्रायोवयंवंचिताः॥ नोस्यान्यत्रनि
शंप्रांतरागतेप्राणवल्लभे॥ अन्यसंभोगचिह्नैस्तुकुपिताखंडितामता॥ यथा॥ रात्रिंयानित्रयपरि
ष्क्रितावल्लभास्तिसहस्त्रंमार्गस्तम्भाममगृहमपिप्रातरेवागतोसि॥ किंकर्त्तव्यंवदनृपतिभिःकीर्त्यनीया
हिस्रवोःक्रोधादोषस्तवपुनरहंकामममायाप्रधित्री॥ कोपात्कांतंपराणुद्य पश्चात्तापसमन्विता॥ कल
हान्तरितानामसूरिभिःपरिकीर्त्तिताः॥ यथा॥ नत्रपातनग्रप्रेसुहस्तोपिजोमम एहिजअरोसकुलसेन॥
अंतरिक्षपणहिमुणिअराध्यंतिविचक्षवेअर्णांसहस्व॥ तदातथाशानयन्प्रियस्त्वयाहृदरोषकलुषे
ण॥ अवधीरितोनशान्तुंराजेतिवियोगवेदनांसहस्व॥ देशांतरगतेकांतोविन्नाप्रोषितभर्तृका॥
यथा॥ त्रैलोक्यप्रथमानकीर्त्तिमहतश्रीवीररुद्रप्रभोस्सेवार्थंविरयसुकाकृतिपुरभूपेषुतद्धोषि
तः॥ द्वारासन्नदिशोनयंतिदिवसान्व्युष्ठाशयाचक्षुयास्तद्याप्रतिबद्धसान्द्रपुलकंव्याकीर्णका
मेषवः॥ कांताभिसरणोद्युक्तास्मरार्त्तासाभिसारिका॥ संभ्रमैरलमस्यद्वैप्रयानस्तुमहीपतिः॥ करेणु ८

स्थानं पश्यामि न सरणो ध्यमिसारिकाः।। आसां नायकानुकूलने सहायाः।। दूतीदासीसखी चैव धात्रेयो प्रतिवे
शिनी।। लिंगिनी शिल्पिनी साधिसहायाः परिकीर्त्तिताः।। एतासां स्वरूपमुदाहरणं च स्पष्टं।। कामशास्त्रप्रसि
द्धाः।। पद्मिनी चित्रिणी प्रमृतयो नातिचित्रोपाः।। अथ संक्षेपेस्य नायिका त्रिविधा।। मुग्धा मध्यमा प्रौढा
चेति।। उदयद्यौवना मुग्धा लज्जाविजितमन्मथा।। लज्जामन्मथमध्यस्था मध्यमा दुतयौवना।। स्मरमं
दिरकृतक्रीडा प्रौढा संपूर्णयौवना।। यथाक्रममुदाहरणानि।। मुग्धेयं मनसापि मोष्य मखिल तन्मलस्मा
वेग्रतांक्रियाकचिदहं वदप्रियसखी प्रश्नाद्यर्थिं नाम्यसि।। आसक्तिस्तव वीररुद्रनृपतौ वाङ्मास्यते किंतु
वेद्रिला रक्तां प्रणयैकवाचि सुतनुर्द सोत्तराज्जया।। मध्यमा यथा।। लोलाविभ्रमपर्वरंगमुदितं तारुण्यमेय
त्रयानेपथ्यांतरद्विवितस्मरकलालास्यप्रपंचप्रियः।। सख्यः पश्यत ककातीयनृपतौ बाध्यानुबंधोज्वलः
काप्यस्यान्तरलज्जुवोविजयते शृंगारनाट्यक्रमः।। प्रौढा यथा।। सहेलं पश्यंत्याः प्रकृतिसुभगं रुद्रनृपतिं तदा
त्रप्रस्फुरद्विविधललिताटोपमधुरं।। रसप्राद्दुर्भावाद्युगपदुदयन्नस्याविक्रमन्होमग्गास्यात्तारुण्ये कुसुमशा
रविलास्यं विजयते।। भेदांतरं यथासमभवमुदाहार्यं।। ।।इति श्री विद्यानाथकृतौ प्रतापरुद्रयशोभूषणे ऽलंका
रे नायकप्रकरणं।। ।। अथ काव्यं निरूप्यते।। गुणालंकारसहितौ शब्दार्थौ दोषवर्जितौ।। गद्यपद्योभयमयं काव्यं
काव्यविदो विदुः।। अदोषौ सगुणौ सालंकारौ शब्दार्थौ काव्यमिति काव्यसामान्यलक्षणं।। शब्दार्थौ मूर्त्तिराख्यातौ
जीवितं व्यंग्यवैभवं।। हारादिवदलंकारास्तत्र स्युरुपमादयः।। श्लेषादयो गुणास्तत्र शौर्यादय इव स्थिताः।।
आत्मोत्कर्षावहास्तत्र स्वभावा इव रीतयः।। शोभामाहार्यकस्याहस्तावत्स्यो वृत्तयो यथा।। पदानुगुण्यविश्रांति

श्रव्या शाब्दे च संमता॥ रसास्वादप्रभेदांस्तु पाकाः॥ पाक इव स्थिताः॥ प्रख्याता लोकवदियं सामग्री काव्यसंपदः॥
वाचकलक्षकव्यंजकत्वेन त्रिविधं शब्दजातं॥ वाच्यलक्ष्यव्यंग्यत्वे त्रिविधं शब्दजातं। वाच्यलक्ष्यव्यंग्यत्वे त्रिविध
मप्यर्थजातं। तात्पर्यार्थो व्यंग्यांतर्गत एव न पृथक्कृतः॥ अभिधा लक्षणा व्यंजना तिस्रः शब्दवृत्तयः॥ गौणवृत्ति
लक्षणाप्रभेद एव संबंधानुपपत्तिमूलत्वात्। यथाग्निर्माणवक इत्यत्र सादृश्यविशिष्टमाणवकप्रतिपत्तिर्विवक्षिता॥
तथैवं गंगायां घोष इत्यत्र गंगासंबंधविशिष्ट॥ तीरप्रतिपत्तिर्विवक्षिता। गंगासंबंधस्योपलक्षणत्वे चोक्तगल
पवित्राद्यसिद्धेः। अत एव सादृश्यनिबंधना संबंधांतरनिबंधना चेति द्विधा लक्षणा॥ संबंधांतरनिबंध
नाजहद्वाच्या ऽजहद्वाच्या चेति॥ सादृश्यनिबंधना सारोपा साध्यवसाना चेति॥ एवं लक्षणा चतुर्वि
धा। कैशिक्यारभटी भारती सात्वती च रचना॥ अतत्त्वेन रसावस्थानस्य चक्रः॥ तथोक्तं दशरूपके॥ कै
शिक्यानरटी चैव भारती सात्वती तथा। चतस्रो वृत्तयो ह्येता रसावस्थानसूचकाः॥ तत्र संकेतिनाद्येगो
चरशब्दव्यापारो ऽभिधा। सा द्विविधा॥ रूढिपूर्विका योगपूर्विका चेति॥ रूढिर्यथा॥ तयोर्विशेषे:
प्रथितेष्टप्रजानां प्रभवेऽत्रत्रैजगतीमहिष्याः भाग्यैः प्रसूते भुवनस्य चास्य विभर्त्ति राज्यं वरवीर
रूढः॥ अत्र सर्वे शास्त्रारूढाः॥ योगपूर्विका यथा॥ राजोऽसौ इन राधीशो रंजयन्सकलाः प्रजाः॥ अत्रान्वयो
वसुमती रत्नगर्भा स्थिरेव च॥ अत्र वसुमती रत्नगर्भेत्यादयो यौगिकाः॥ वाच्यार्थानुपपत्त्या तत्संबंधि
न्यारोपितः शब्दव्यापारो लक्षणा॥ तत्र जहल्लक्षणा यथा॥ तं तु काकुत्स्थभर्तुराकृष्य पटहध्वनिं॥
सामंतनगराण्युच्चैराक्रोशंति समंततः॥ अत्र नगराण्याक्रोशंतीति वाच्यस्यानन्वयः॥ अचेतनानामाक्रो ५

द्गास्वंभवात्॥ अजहल्लक्षणा यथा॥ प्रत्यहं काकतीनाथस्य पादपीठमनारतं। स्फुरद्रत्नप्रभाजालैरलंकुर्वंति
मौलयः॥ अत्रालंकरणसिध्यर्थं मौलिनिराश्रयतान्वयोलक्ष्यंते॥ सारोपलक्षणा यथा॥ मंथानाचल
मूलमेखलकल्लोलसंघट्टनस्वामिकां कारयन्तुहिनलीलोस्फुरतियस्मारंगमाचक्षते॥ मुन्येनाञ्च हृदि वीररुद्रनृप
तेः कीर्तिश्रियानिर्जितस्तन्मृगांकवराहमिंदुरुचसौ विभ्रन्समुज्जृंभते॥ अत्रचंद्रस्य कु[illegible]रूपे कुरंगे वराह
आरोप्यते॥ विषयविषयिणोरभिन्नयोस्तयोरभेदप्रतिपत्तिरारोपः॥ विषयनिगरणेनाभेदप्रतिपत्तिरध्यवसा
यः॥ साध्यवसानलक्षणा यथा॥ काकतीयकुलांभोधेः प्रभवत्येष चंद्रमाः। धृतः कुवलयोल्लासोयनोदय
मुपेयुषा॥ अत्र प्रतापरुद्रे चंद्रत्वमध्यवसीयते॥ काकतीयकुलांभोधिरित्यारोपश्च॥ अथ व्यंजनावृ
त्तिः॥ अन्वितेषु पदार्थेषु वाक्यार्थोपस्कारार्थमर्थांतरविषयः शब्दव्यापारो व्यंजनावृत्तिः॥ सा त्रिधा॥ श
ब्दार्थोभयशक्तिमूलत्वेन॥ तत्र शब्दशक्तिमूला यथा॥ वाहिन्यः काकतींद्रस्य सर्वतोमुखसंगताः॥ कु
र्वन्त्युच्छलत्कबंधाढ्यं प्रतिपक्षपक्षे वलार्णवं॥ अत्र वाहिनीसर्वतोमुखकबंधशब्दानामर्थप्रकरणादि
नासैन्यसर्वतोव्यापित्वलक्ष्मनमस्तकदेहपराणां वाचकत्वे नानियंत्रते पि शब्दशक्तिमूल्यनदी प्रतिपत्तिर्जा
यते॥ सा व्यंजनावृत्तिः प्रकरणार्थपर्यवसिता अभिधानशक्तौ॥ अप्राकरणिकार्थप्रतीतिं कर्तुं प्राकर
णिकार्थस्यापि शोभ्यर्थं वक्तुर्विवक्षितत्वादिन्यान्यतस्तत्प्रतीतेर्व्यंजनार्थे व्यापारांतरं शब्दस्यैव कल्प्यते॥
नात्र लक्षणा संभवति वाच्यानुपपत्त्यभावात् न चात्र व्यापारद्वये नार्थप्रतिपादने वाक्यभेदः॥ प्रयोक्तृवि
वक्षापरतत्वात् लौकिकवाक्यानां॥ अर्थशक्तिमूला व्यंजनावृत्तिर्यथा॥ अस्याः कृतिभिर्भर्तुः क्षोणी
वाणीगृहोत्सवे॥ अंगुष्ठेनालिखन्भूपाः पादपीठे नतानना॥ अत्र भूपविषण्णाइत्यर्थशक्त्या व्यज्यते॥

न्वार्थशक्तिमूले व्यंजनेऽनुमानशंका व्यंग्यव्यंजकयोरविनाभावाभावात्॥ नन्वानन्तर्यादिकार्यस्यानेककार-
णत्वात्॥ नियतकारणप्रतीतिर्विवक्षानुगृहीताच्छब्दादेव॥ किंच एकस्मादेव व्यंजनात्। तत्तत्प्रतिपत्तृविवक्षा-
नुसारेणानेकव्यंग्यार्थप्रतीतिरनुमानपरिपाठीविरुद्धा॥ नन्वभिधावृत्तिः॥ संकेतितार्थनस्यापरिच्चयः॥ इय
तीगमनिका॥ उभयशक्तिमूलो यथा॥ विजितनृपपुरो मत्तो विलसत्सर्वमंगलः॥ राजमौलिरसौ भाति रुद्
द्रैवाजगत्पतिः॥ अत्र विजितनृपपुर इत्यर्थशक्तिमूलत्वं विलसत्सर्वमंगल इति राजमौलिरिति शब्दशक्तिरि
ति उभयशक्तिमूलत्वं॥ तत्रापरद्वयोरुपमालंकारध्वनिः॥ अथ कैशिक्यादीनां स्वरूपं निरूप्यते॥ जयत्यर्थसु
कुमारार्थसंदर्भो कैशिकी मता॥ अत्युद्धतार्थसंदर्भो वृत्तिरारभटी मता॥ इषन्मध्यार्थसंदर्भा भारती वृत्तिरिष्यते॥
ईषत्प्रौढार्थसंदर्भा सात्वती वृत्तिरिष्यते॥ अत्र॥ जयत्यर्थसुकुमारो हि शृंगारकरुणो मतो॥ अत्युद्धतरसो
रौद्रबीभत्सोपरिकीर्तितो॥ हास्यशांताद्भुतादिर्हि सुकुमाराः प्रकीर्तिता॥ ईषत्प्रौढौ समाख्यातौ रसौ वीरभया-
नकौ॥ यत्र शृंगारकरुणावतिकोमलसंदर्भेण तेतत्र कैशिकी॥ यत्र रौद्रबीभत्सावतिप्रौढेनसंदर्भेण प्रति-
पाद्यते तत्रारभटी॥ यत्र नातिसुकुमाराः हास्यशांताद्भुता नातिसुकुमारेण संदर्भेण समर्प्यंते तत्र भारती
यत्र नातिप्रौढेन संदर्भेण धीरभयानकौ निर्वाह्येते तत्र सात्वती॥ कैशिकी यथा॥ जितमदनविलासंका
कुतीयान्वयेंदुं नरमतिमवनींद्रं दृष्टुमाशंसनीनां॥ सपदि विरचितासीदंगनानामपांगैर्दिवि कुवलय
दाम्निश्यामलातोरणश्रीः॥ आरभटी यथा॥ खड्गा॥ घातनिष्कृतशत्रुवक्षोनिर्गतरक्तच्छटाज्वालैरुद्र
टशस्त्रच्छटनत्स्वस्फारत्स्फुलिंगोत्करैः॥ स्थानास्तकृपिशितास्थिखंडविकटस्थलो ज्वरांगारकैरुद्ध ८

उज्ज्वलमतिगणय नृपतेः क्रौंचध्वनिरायोधने॥ भारतीयथा॥ जोनस्यं महृदैन्य देवमहितः कोप्येष गंभीरिमाका
ण्यन्यासरणिः प्रतापयशसो रन्येवबाह्वोः पृथा। सर्वं नूतनमेवरूढ नृपते ज्ञानेन तन्निर्मितो सामग्रीच्चतुरा
ननेनकृपतीकीदृक्क्रमाकल्पिता॥ सात्वतीयथा। दुरादाकुण्ठविम्बप्रसमरयशसोवीररूढस्य जैत्रप्रस्था
नारंभे क्षीतिनिनदमतिनृपाः पूर्णकर्णज्वरार्ताः॥ जातत्वाद्वीन्विशोतोगहनमतिमहन्नकंटकाकृष्टवेशास्त्रा
यध्वंमुंचंतीतिप्रतिनृपतिधियापादयानूपार्थयंते। मध्यमारभटी सन्या लघ्वामध्यम कैशिकी। वृत्तीदूने
उभेसर्वरीतिसाधारणे मते। न दृश्येप्यनतिप्रौढवृद्धा मध्यमकैशिकी। शृंगारकरुणयोरतिसुकुमारयो
रत्य प्रौढसंदर्भेण न दुष्यति। किं त्वतिप्रौढसंदर्भा नेष्यते। प्रतिकूलवर्णरूपदोषापत्तेः॥ मध्यमारभटी
प्रौढे व्यर्थेनापि मृदुक्रमा। अप्रतिप्रौढ वीरौद्रबीभत्स वतिषन्मृदुबंधोन दुष्यति। अतिमृदुसंदर्भस्तु
विरुद्धः॥ मध्यम कैशिकीयथा॥ जासन्नेपि महोत्सवे कथमपि नस्यन्तप्रवासे व्रजे धिक्धिक्सा हसमाव
योविघटनाक्रोवाविधिर्वाछति। दृष्टस्त्वमनि वानितात्रियतमप्रस्थानबुद्धिस्थितो वेध्यामृत्कलिकाकृती
यन्नृपते त्वदरिनारीजनः॥ मध्यमारभटी यथा॥ मांसक्रीकृद्रासंकीर्णप्रसरदुधिरापगाः। वसाकर्दमिता
युद्धे भुवो धूकषभटैः कृताः॥ एवं रसो तरेष्वुदाहरणं कृत्तैव्यं। वैदर्भ्यादिरीतीनां पाञ्चगुणात्रेतानामर्थ
विशेषनिरपेक्षत्वेन केवलसंदर्भसौकुमार्यप्रौढत्वमात्रविषयत्वात्। कैशिक्यादिभ्यो भेदः॥ संदर्भ
स्यातिमृदुत्वं न संयुक्तकोनलववर्णबद्धत्वं संयुक्तेमृदुवर्णेषुईषन्मृदुत्वमविकटबद्धपरुषवर्णैर्द्धी
घप्रौढत्वं॥ अथरीतीनां स्वरूपमुदाहरणं च। रीति र्नामगुणाश्लिष्टा वर्णसंघटनामता। वैदर्भीगौडिप

चालीश्रय्या चेति ॥ बंधपारुष्यरहिता शब्दकाठिन्यवर्जिता ॥ नातिदीर्घसमासा च वैदर्भी रीतिरिष्यते ॥ तथा ॥ का
कतीयनरेंद्रस्य कीर्त्तिचंदनचर्चनं ॥ दिगंगनाविततन्वती वतंसीकृततद्गुणाः ॥ यथा च ॥ वितरणगुणलालितोविता
मृघलोके प्रभवति नरनाथे काकतीयान्वये ऽ ॥ सुरतरुमणिनायां कामधेनुप्रसंगे क्षितिसुरजननत्येयं ना
तिक्रोल्लहलासील ॥ ओजःकान्तिगुणोपेता गौडीरीतिरितीष्यते ॥ यथा च ॥ उद्यद्दोस्तंभरवड्गनटद्दरिमुकु
टाटोपसंजातराटुं नीतिभ्रूरूपसंपत्ता काभयचरणचरस्फारणाक्षीररेणुः ॥ अंधयक्षा भक्तराशी दृष्टिकरण
धुराभिन्नमत्तेभकुंभकौघनुकोष्वतरानिकरपरिचूतस्वबंधवस्तु बंडा ॥ पंचालीरीति वैदर्भी गौडीरी
स्फुत्तयात्मिका ॥ यथा ॥ जंतुः काकुती वीररु इन्नपते जैत्रप्रयाणे स्थिते ॥ तोणीरेषु नरेषु नृपतिभिन्नं
भूयिष्ठमंबिभ्रति ॥ जाताम खे नदी विशंकुटतटो दीर्घो विय द्दीर्घिका गाद गूढलमाच गौ त्तमनदी पाताल
गंगायते ॥ तथा च ॥ स्थाने तत्र बलमत्ति गंडन्नपते त्वरवड्गनो मीदृष्टन् प्राज्ञेयसटितोयमेतिस तलवि
लेतदसृग्भुतं ॥ पीतेन प्रतिपक्षपार्थिवयशः क्षीरेण गौरत्विषं यस्य बंधयति त्रिलोकभरिता स्वकीर्त्तिल
स्फीसुधां ॥ अथ शय्या ॥ या पदानां परान्योन्यमैत्री शय्येव कथ्यते ॥ यथा ॥ दानुःकाकुत्तिवंशमंडनमणे
निस्सीमविश्रावनश्रद्धाचालंबितकल्पपादपगुणाश्रोदेरगाधोयशः ॥ चित्रं शारदकौमुदीपतिमल
सामंतसीमंतिनी गंडानोगनिरूढपांडिमधुराधत्तेयशः प्रायशः ॥ अत्र पदविनिमयासहिष्णुत्वान्
बंधस्य पदानुगुण्यरूपा शय्या ॥ अर्थगंभीरिमा पाकः सद्द्विविधा हृदयंगमः ॥ द्राक्षापाको नालिकेर 6
पाकश्च प्रस्फुटांतरा ॥ द्राक्षापाकः ॥ सकथितो बहिरंतः स्फुरद्रसः ॥ यथा ॥ स्मरस्मेरामंदस्मितमधुर

सौरभ्यसुभगां मनाक् श्रीलाजाजातप्रणयरसकल्लोलहृदि तान् ॥ कलानेकस्कंधारमनसिजसहस्त्राणि सृजतः क
टाक्षान्वामांगी सृजति परितोषं रुद्रनृपतिः ॥ सनारिकेरपाकः स्यादंतर्गूढरसोदयः ॥ यथा ॥ लीलाविभ्रमेष्वपि ॥ अत्रान
द्रागर्थप्रतीतिः ॥ एवं वस्त्वलंकारप्रतीतावपि द्रष्टव्यं ॥ पाकांतराण्यपि यथासंभवमूह्यानि ॥ अथ काव्यविशेषाः ॥ व्यंग्य
स्य प्राधान्याप्राधान्याभ्यामस्फुटत्वेन त्रिविधं काव्यं ॥ व्यंग्यस्य प्राधान्ये उत्तमं काव्यं ध्वनिरिति व्यपदिश्यते ॥
अप्राधान्ये मध्यमं गुणीभूतव्यंग्यमिति गीयते ॥ व्यंग्यस्यास्फुटत्वे ऽधमं काव्यं चित्रमिति कथ्यते ॥ ध्वनिर्यथा ॥ स्वा
मिन् गोत्रमहीधरान् किमधुना नीचैर्विधत्से कुतो गाधानंबुनिधीन्करोषि कुरुषे किं दिक्पतीनल्पकान् ॥ दृक्संपा
र्श्वचरानुलापमखिलं न्यक्कृत्य धर्मैषिणा सृष्टः पद्मभुवा गुणैकवसतिः श्रीवीररुद्रो नृपः ॥ अत्र प्रतापरुद्रस्य
कुलक्रोकुलातिशायिसमुन्नतत्वमतिसांद्रगांभीर्यं लोकपालाधिकत्वं च व्यज्यते ॥ गुणीभूतव्यंग्यं यथा ॥
प्रत्यग्रप्रसरत्प्रतापविभवव्याप्ताखिलाशांतरे विश्वत्रातरि वीररुद्रनृपतौ सिंहासनध्यासिनि ॥ आस्थानी
समुपागतैर्नृपतिभिस्तास्तास्तथा दर्शिताः श्रेष्ठास्याभिरमुष्य काकतिविभोर्दृष्टिः कृपादिः कृपा ॥ अत्र प्राप्तानि
खेदं महोत्सवस्य प्रतापरुद्रदेवमहाराजस्याग्रेसरणाधिनां पार्थिवानां तथाविधकार्पण्यासक्तिः पुनः प्रणाम
दिव्यं गंतास्तास्त्वे श्यादर्शितादृति ॥ वाच्यानतिशायीति गुणीभूतव्यंग्यता ॥ चित्रं यथा ॥ क्षोणीरक्षणदक्षिणा
क्षतजगच्छेभाद्दीप्तक्रमानद्भुतदृष्टत्रयपदृष्टिधि क्षपणविधौ प्रोक्षित्तकौलेयकाः ॥ उद्दामोद्यमनस्वरत्नृपते
र्दोर्दंडयोश्चंडयोर्भेजे नदुर्जनयोर्गवपर्वतभिदादंभोलयः केलयः ॥ अर्थचित्रं यथा ॥ खंगेजुन्नवित्त्वं त्रीहि सरिठ
मह्हिणा हं जलिलिंबिबिजंपे छित्ताजअलंकि दंभोलयः केलयः वासकमलं भणंतिर्व्विणागुणो ॥ मं जेवीरपआव
रुंदविस्तुणोजंणोसुखेतुं पुणोसिंगेएरि उजीविज्ञा इविहिं णोगच्छंसवीठं अज्ञं ॥ खड्गेयुद्धे विजंभनेरिपुमही

नाथांजलिंबिंबितंपश्यंतोजूयलक्ष्मिवासकमलंमन्यतेविलासिनितः ॥ मन्येवीरप्रतापस्यद्विषत्सुज्ञियेषुगहीतुंपुन
स्स्पृष्टेरिपुजीवितानिविद्येगोद्धृतः पीतांबुजं ॥ उभयस्त्रित्रंयथा ॥ विद्यासमुद्रेप्युवनेवप्रस्फुदेप्रतापस्फुदेविजितारिव
र्गे ॥ रसाविनिद्रेधृतश्नोयकांतेवपृथ्वीरमतेगुणाढ्ये ॥ अत्रानुप्रासोपमयोश्चित्रता ॥ अथध्वनिविशेषोनिरूप्यते ॥
अथध्वनेर्लक्षणाभिधामूलत्वेनाविवक्षितवाच्यविवक्षितान्यपरवाच्याख्यौप्रथमंद्वौभेदौ ॥ अविवक्षितवाच्य
स्यार्थांतरसंक्रमितात्यंततिरस्कृतवाच्यत्वाद्विविधस्यवाक्यपदगतत्वेनद्विविध्येचातुर्विध्यं ॥ विवक्षितान्य
परवाच्यस्यसंलक्ष्यासंलक्ष्यक्रमव्यंग्यस्यशब्दशक्तिमूलत्वस्वलंकाररूपतयाद्वैविध्येवाक्यपदगत
त्वेनचातुर्विध्यं ॥ अर्थशक्तिमूलेसंलक्ष्यक्रमव्यंग्येअर्थस्यस्वतस्संभवित्वेनकविप्रौढोक्तिसिद्धत्वेनक
विनिबद्धोक्तिसंबंधेनचत्रैविध्यं ॥ त्रैविध्येवस्त्वलंकाररूपतयाद्वैविध्ये ॥ षड्विधत्वस्यापिव्यंग्यव्यंज
कतयाद्वैविध्ये ॥ द्वादशविधत्वं ॥ द्वादशविधस्यापिप्रबंधगतत्वेनवाक्यगतत्वेनपदगतत्वेनचत्रै
विध्येषट्त्रिंशत्प्रकारो ॥ अर्थशक्तिमूलोनरणनध्वनिः ॥ उभयशक्तिमूलोवाक्यगतत्वेनैवविधएव
संलक्ष्यक्रमव्यंग्यध्वनेरेकचत्वारिंशत्भेदाः ॥ असंलक्ष्यक्रमव्यंग्योरसादिध्वनिः प्रबंधवाक्यपदपदैक
देशरचनावर्णगतत्वेनषड्विधः ॥ एवंविवक्षितान्यपरवाच्यध्वनेसप्तचत्वारिंशद्भेदाः ॥ अविवक्षितवा
च्यस्तद्भेदैश्चतुर्भिस्सहध्वनेःप्रथमंशुद्धाएकपंचाशद्भेदाः ॥ असंलक्ष्यक्रमव्यंग्योरसादिध्वनिः तेषांप्रत्येक
मेकैकस्यएकेनसंबंधेप्रथमस्तद्भेदस्यएकपंचाशद्भेदाः ॥ द्वितीयस्यपंचाशद्भेदाः ॥ तृतीयस्यएकोनपंचा
शद्भेदाः ॥ अनेनैवक्रमेणोत्तरोत्तरस्य ॥ एकैकभेदपरित्यागेषड्विंशत्युत्तरशतत्रयाधिकसहस्रसं
ख्याकामिथोभेदाः ॥ अविवक्षितवाच्यस्यविवक्षितान्यपरवाच्यस्यचसंबंधेयोभेदस्तस्मिन्नेवतद्द्वतौवि

वक्षितान्यपरवाच्यस्याविवक्षितवाच्यस्य संबंधभेदेन पृथग्भूतेः॥ अनेनैव क्रमेण वस्तुध्वनेरलंकारे ध्वनिः
संबंधत्वेऽपि जलंकारध्वनेर्वस्तुध्वनिसंबंधेन पृथग्भूतत इति॥ पूर्वपूर्वस्योत्तरोत्तरसंबंधं एवैकभेदन्यून
तात्तेया। तस्यापि मिश्रणस्य संदेहास्पदत्वेनानुग्राह्यानुग्राहकत्वेनैकव्यंग्यकानुप्रवेशेन त्रिरूपेण संस्का
रेणैकरूपया संसृष्ट्या च पुनश्चतुर्धा योजने चतुरुत्तरशतत्रयाधिकपंचसहस्राणि भेदाः॥ शुद्धाश्चंदशा
यो मिश्राः क्रतुनेत्रानलेंदवः संसृष्टिशाकरायतास्त्वधिकी निश्शराभिधाः। अत्र शुद्धानामेकपंचाशद्भेदानां
नामधेयानि कथ्यंते। पदगतार्थांतरसंक्रमिताविवक्षितवाच्यध्वनिः॥ पदगतात्यंततिरस्कृतावाक्यगता
र्थांतरसंक्रमितावाच्यध्वनिः पदगतात्यंततिरस्कृताविवक्षितवाच्यध्वनिः॥ वाक्यगताध्वनिः पदगत
शब्दशक्तिमूलविवक्ष्यत्क्रमवस्तुध्वनिः। पदक्रमालंकारध्वनिः॥ वाक्यध्वनिः॥ पदगतस्वतःसिद्धार्थशक्तिम
लोवस्तुनावस्तुध्वनिः पदऽलंकारेणालंकारध्वनिः॥ पदगतस्वतःशक्तिमूलोऽलंकारेण वस्तुध्वनिः॥ वा
क्यगतस्वतःसिद्धार्थवस्तुमूलो वस्तुनावस्तुध्वनिः। वाक्यऽलंकारध्वनिः॥ वाक्यालंकारेणालंकारध्वनिः।
प्रबंधगतस्वतःसिद्धार्थशक्तिमूलोवस्तुनावस्तुध्वनिः॥ प्रबंधऽलंकारध्वनिः॥ प्रबंधऽलंकार[illegible] ध्वनि
प्रबंधऽलंकारेणवस्तुध्वनिः॥ पदगतकविप्रौढोक्तिसिद्धार्थशक्तिमूलोवस्तुनावस्तुध्वनिः॥ पदऽलंका
रध्वनिः॥ वाक्यऽलंकारेणालंकारध्वनिः। वाक्यलंकारेणवस्तुध्वनिः॥ प्रबंधगतकवि॥ वस्तुनावस्तु
ध्वनिः। प्रबंधलंकारध्वनिः प्रबंधलंकारेणालंकारध्वनिः॥ प्रबंधलंकारेणवस्तुध्वनिः॥ पदगतकवि
निबंधोक्तिसिद्धार्थशक्तिमूलोवस्तुनावस्तुध्वनिः॥ पदऽवस्तुनालंकारध्वनिः॥ पदऽलंकारेणालंका

रध्वनिः॥ पदऽलंकारेणालंकारध्वनिः॥ वाक्यलंकारेणवस्तुध्वनिः॥ प्रबंधवस्तुनावस्तुध्वनिः॥ प्रबंधेऽ वस्तु
नावस्तुध्वनिः॥ प्रबंधऽवस्तुनालंकारध्वनिः॥ प्रबंधऽलंकारेणालंकारध्वनिः॥ प्रबंधऽलंकारेणवस्तुध्व
निः॥ प्रबंधगतसंलक्ष्यक्रमव्यंग्योरसादिध्वनिः॥ वाक्यपदपदैकदेशभेदेन॥ रचनागतासंलक्ष्यक्रमव्यं
ग्योरसादिध्वनिः॥ वर्णगतासंलक्ष्यक्रमव्यंग्योरसादिध्वनिः॥ वाक्यगतोभयशक्तिमूलोरसादिध्वनिः॥ तत्रदि
ङ्मात्रमुदाह्रियते॥ पदगतार्थांतरसंक्रमितवाविवक्षितवाच्यध्वनिर्यथा॥ मूढो नोध्ध्वयमस्माकाकिमिस्रोन
ल्यशालिनः॥ इतिप्रतापरुद्रस्यप्रणताःप्रतिपार्थिवाः॥ अत्रास्माकादितिसर्वदैन्यक्तमयोवयमीदृशामस्माकं
संबंधिनइत्यर्थांतरसंक्रमितवाच्यंनोकाम॥ अत्यंततिरस्कृतवाच्यंयथा॥ विशदिमविलिप्तवियतोद्यवाक्ति
मपरिपूरिताखिलाशांताः॥ विहरंतियशःपूरागौराश्रीकाकतींद्रस्य॥ अत्रविशदिमविलिप्तवियतइति
अत्यंततिरस्कृतवाच्यं॥ अनेनैवक्रमेणवाक्यगतत्वेनाप्युदाहार्यं॥ अथार्थशक्तिमूलेवस्तुनावस्तुध्वनि
र्यथा॥ अब्ध्यानृतान्विनामासारम्रकूपसान्विनातिथी॥ रात्रिंदिवंनाचकांक्षंतेकाकतीयरिपुस्त्रियः॥ अथ
ऋतुप्रभृतीनांमन्मथोद्दीपकत्वात्तदभावोरिपुस्त्रीभिएकाकितइतिप्रतीयते॥ तेनतासांप्रियवियोगरूपंवस्तु
व्यज्यते॥ तेनप्रतापरुद्रस्यसर्वेपिशत्रवोनिहताइतिवाच्यादतिशयः॥ अपप्रियविरहेविधुराःशत्रुस्त्रियःक
तिपयवत्सरान्जीविताशयाप्रथममनंतरनामभावंवांछंति॥ अनंतरंनामपिगमयितुमशक्ताःकतिपय
मासेषुप्राणान्धारयितुमुत्सुकाः॥ ज्योत्स्नावतांपक्षाणांविनाशंवांछंति॥ अनंतरमासानपि अपनेतुम
पारयंत्यःकतिपयतिथिजीविताशयाराज्ञीणामस्पृहामभिलषंतिबहुवस्तुनाव्यज्यते॥ वस्तुनालंकारध्व
निर्यथा॥ दृष्ट्वाकाकतिवीररुद्रनृपतेःकीर्तिंजगव्द्यापिनीवस्तुवांछतिशंभुरत्रशयितुंलक्ष्मीपतेःकांक्षते॥ स्वा

तुंगां स्तुति दिव्यनाप सगण संबंधिनुंबाधंय श्चेष्टं ते सविलास संभ्रमुरपि स्पष्टुं शानैरीहते ॥ अत्र हरस्य कैलासभ्रांतिः
हरेः क्षीरार्णवभ्रांतिरिति भ्रांतिमदलंकारो व्यज्यते ॥ अलंकारेण वस्तु ध्वनिर्यथा ॥ प्रतापरुद्रस्य रणे कृपाणस्य
समुद्यद्रुधिरारुणाश्रीः ॥ आलंबते रोषकषायितस्य कालोकटाक्षस्य विडंबितानि ॥ आलंबत इति निदर्शना
लंकारेण सकलरिपुक्षय- क्षणान्निरूपत इति वस्तु व्यज्यते ॥ अलंकारेणालंकारध्वनिर्यथा ॥ काकतीयवित्ते
कीर्त्तिपुंडरीके विडंबिते ॥ धत्ते मधुकरक्रीडां तमालश्यामलं नभः ॥ अत्र कीर्त्तिपुंडरीकेन नभसोत्र भ्रमरक्रीडां
धत्ते इति निदर्शनालंकारेण ॥ अयाश्रयिणोरानुगुण्यरूपोधिकारो व्यज्यते ॥ आश्रयस्य कीर्त्तिपुंडरीक
स्यवैपुल्यं भ्रमरसादृश्यस्य प्रतिपादनेन नभसोऽल्पत्वं च प्रतीयते ॥ एतेषु स्वतःसिद्धार्थशक्तिमूलत्वं ॥ क
विप्रौढोक्तिसिद्धार्थशक्तिमूलं तु यथा ॥ आवं ॥ आवंखुरलिविभरन्तकान्तिकृत्येषु जालम्बेंदुस्थकजेवणाय
दृक्चारिणीं चारणौघैः ॥ श्रीमत्तगीतां भुवनमहितां काकतींद्रस्य कीर्त्तिं क्रौंचक्ष्माभृन्न भवति महतो विस्म
यानिश्चलांगाः ॥ वस्तुनालंकारध्वनिर्यथा ॥ वीररुद्रभटान्दृष्ट्वा जयलक्ष्मीवृतान्रणे ॥ कर्षंसरिवधू
केशानूकाननेकंटकी द्रुमाः ॥ जयश्रीसमालिंगितान्वीररुद्रभटान्दृष्ट्वा समदनाइवकंटकी द्रुमास्तत्रु
वधूकेशानाए ॥ अपगमुण्भुण्णं वसविहग एमनन्भैरेदूइए ॥ अपसर खीभिस्सं मंलभवाण्पखाः ॥ द्वि
धिलम्भानायाः ॥ आलग्रहेपाश्यपेनेवसविधगतेमनोहरे दयिते ॥ अत्रोत्प्रेक्षयालिंगनादिरूपं वस्तु व्य
ज्यते ॥ अलंकारेणालंकारध्वनिर्यथा ॥ अपसर्पंयांच मानानां काकतीयेंद्रविद्विषां ॥ रक्षनांगीकरोतीव वनं
शाखाग्रकंपनैः ॥ अत्र नांगीकरोतीवेत्युत्प्रेक्षया प्रतापरुद्रशत्रुप्यार क्षणं कर्तुं विपत्तिविस्फुटेक्षा ॥ व्यज्यते ॥

कविनिबंधोक्तिसिध्यर्थशक्तिमूलत्वं यथा॥ यशःपाथस्तवरायोर्नरनाथकुतूरत्त्वपं शशिनः॥ यत्तयाकटाक्षोल्का
जारध्वागमम हर्षितं॥ अत्रो विरहानुरागः प्राणैश्चंद्रकमसह मानतोषो ज्वलितयाकटाक्षोल्काया चंद्रमहर्षिकं
रोतीति। रक्षणीयद्वयेनेनवस्तुनाइतः परासूजीवितद्वारयितुं नशक्नोतीति॥ अधुनेवच्चयाआगतव्यमितिवस्तु
नाअलंकारध्वनिर्यथा। कस्त्वंभुआदिविलागम्भ्रनसिननुयक्षोवीरूदइस्यकीर्तिकोयंतु दीप्रदेहस्फुरत्तिपरिसरेमन
सुहृत्तस्तापः प्राच्छाच्छालंस्फुरद्भिः कुमुदसरसिजैः स्थापितं सवत्सपं सोमाकोस्वागतो वामवधिधि रिरहं
कल्पितोनिस्तमस्कः॥ अत्रप्रस्तापत्तइयशः प्रलापयोः सोमार्कसादृश्यप्रतीतेरूपमाव्यज्यते। अलंकारेणा
लंकारध्वनिर्यथा॥ उअंवहदुअवदुएतनुआरूढो विभ्भिहरोमावो॥ पीयइसमाअमसंभमसंपजह
ओवओसरइ॥ पस्य तह लावथा तर्याद्रूढो पि निर्भरोमानः॥ न पतिस मागमसंभ्रमसंजातभय
इवापसरति॥ अत्रो स्त्रेत्तयाप्रियप्रार्थनाविनेव मानिनीमानः प्रस्कन्नः इतिविभावनालंकारो व्यज्य
ते॥ अलंकारेणवस्तुध्वनिर्यथा॥ आप्राप्यसेवावसरं नायका तात्र तस्यते। स्वेदीपितसावमाने
चश्यामासर्वांगपांडुरा॥ अत्रसावमाने वेस्मुप्रेक्षयास्वधास्वीकार्यत्वादिकं वस्तुव्यज्यते॥ ए
वंप्रबंधादिगतत्वेनयथासंभवमुदाहरणानि दृष्टव्यानि॥ विस्तरभयादिह नोक्तानीति। यथाशब्द
शक्तिमूलध्वनिः॥ सचवस्त्वलंकारगतत्वेन द्विविधः॥ तथा चोक्तं। अलंकारोपवस्त्वेव शब्दाद्यत्रावभा
सते। प्रधानत्वेनसंज्ञेयश्शब्दशक्त्युद्भवो द्विधा॥ अत्रालंकारध्वनिर्यथा॥ एसोसंचरजाआसामा
खुतुमंससमाअमोदो॥ किउगणन्णापवोसकहाविसइएप्रंरवुअंबरिअं॥ एषससंराजाश्यामस्व १०

लुलंसमागमोद्वयोः॥किंपुनर्नप्रदोषकथाद्यपतरलल्पस्य चाश्चर्यं॥अत्रप्रकरणेनकांताभ्रूपवाच्यकाभ्यांश्या
मराजशब्दाभ्यांनिशाचंद्रप्रतीतेरूपमाव्यज्यते॥वस्तुध्वनिर्यथा॥कांतारवाससंतप्तप्रासंस्मृणुध्वंहितो
दितं॥कुरुध्वमधुनाराजपदसेवांनरेश्वराः॥अत्रराजपदसेवानिमित्तानिश्चब्दशात्प्रवृत्तस्यप्रतापरु
द्रस्यप्रतीतिःप्रकरणाज्ज्ञायते॥अनेनप्रतापरुद्रस्यसेवाकर्त्तव्याविमरण्यवासेनसंतप्ताइतिवस्तुव्यज्य
ते॥उभयशक्तिमूलध्वनिर्यथा॥जिष्णुरेषभुजस्तंभजंभमानाद्भुतायुधः॥मुंचंतुक्ष्माभृतःसर्वेनिजप
क्षविजृंभितं॥अत्रक्ष्माभृत्तोनिजपक्षविजृंभणंमुंचंतुजिष्णुरेषःइत्यत्रशब्दशक्तिमूलता॥असंलक्ष्य
क्रमव्यंग्योरसादिध्वनिः॥तथाचोक्तंशृंगारतिलके॥रसभावतदाभासभावशांत्यादिक्रमः॥भिन्नोरसा
द्यलंकारादलंकार्यतयास्थितः॥रसस्याबोदाहरणस्वरूपनिरूपणप्रपंचोरसप्रकरणेव्यक्तविष्यति॥गुणी
भूतव्यंग्यध्वन्यंकाव्यमष्टविधं॥तथाचोक्तंकाव्यप्रकाशे॥अगूढमपरस्यांगंवाच्यसिध्द्यंगमस्फुटं॥संदिग्ध
तुल्यप्राधान्येकाकाक्षिप्तमसुंदरं॥कर्णाटकामिनीकुचकलशावदगूढस्यैवचमत्कारित्वात्॥अगूढव्यं
ग्यमध्यमंकाव्यं॥यथा॥जोनस्ययदिवर्ण्यंतेरिपवःक्षुभ्यंतिनीचैःस्थिताःगांभीर्ययदिकीर्त्यतेज
लधयःक्षुभ्यंतिगाधीकृताः॥तत्सौवर्णयितुंविभेमियदिवाजातोस्यगस्त्यस्थितस्तस्याधैर्यगुणास्त्वरोह
णगिरेःश्रीवीररुद्रप्रभो॥अत्रयदिवाजातोऽगस्त्यइत्यनेनजलनिधिपर्वतेभ्योनविभेमीतिव्यंग्यम
गूढं॥अपरस्यांगंह॥यत्ररसादेरसादिरंगंतदपिगुणीभूतव्यंग्यमेव॥यथा॥वीतव्रीडमपास्तनोन
मुद्रयदेश्चर्येनाविभेवल्लोदंनिर्भरगात्रवेपथुमिलत्कंठगलद्वाष्पकं॥संजातप्रळयेचकाकतिम

महीनाथ त्वत्सरोद्वेजितक्ष्मपाः शैलगुहासु यांति किं जनभीत्या समालिंगिता।। अत्र शृंगारस्य भयरसांगत्वं।। वा
च्यसिद्ध्यंगं यथा।। करालः काकतींद्रस्य करवालनवांबुदः।। स धाराया समयत्युग्रप्रतापज्वलद्द्विषां।। अत्र
जलधाराव्यंग्या सा च करवालनवांबुद इत्यस्य वाच्यस्य तस्य रूपकस्य सिद्ध्यंगमिति गुणीभूतं।। अस्फुटं यथा।
वीररुद्रनृपालस्य महिमा कोप्यनंतकः।। प्रसूते कीर्तिगंगा याः पीत्वाब्धिं बदसत्कृनन्दी।। अत्र रुद्रनृपालस्य सवि
ष्ण्वाद्यतिरेकपरमः स्फुटः प्रतीयते।। संदिग्धप्राधान्यं यथा।। काकतिक्ष्मापतेर्दृष्टिरनुरागतरंगिता।।
लग्नाकल्हारमालेव वध्वास्तुंगे कुचद्वये।। अत्रालिंगनेच्छायां कटाक्षस्य विश्रांतिः।। उत वा स्तनमंडला
वलोकन एवेति वा संदेहः।। तुल्यप्राधान्यं यथा।। नृपाः प्रतापरुद्रस्य निषेवध्वं पदांबुजे।। अन्यथा सुम
नस्तादृक् प्रसादं कलुषायते।। अत्र प्रतापरुद्रस्य पादसेवा यदि त्यज्यते।। तदानीं नगरेषु वासो दुर्लभ इति व्यं
ग्यस्य वाच्यस्य च समप्राधान्यं।। असुंदरं यथा।। एकासिलपमहिलाणं सोहणरेंदं सदंसं काम्नो अं।। गुरुअण
पिअति दाए बहुआए सामलिवअणं।। एकशिला महिला नाम्नृबाना नेंद्रदर्शनाम्नोदं।। गुरुजननियंत्रिता
वध्वा श्यामलवदनं।। अत्र नरेंद्रदर्शननिमित्तहर्षपरवशाया वध्वा मुखं श्यामलमिति वाच्यस्यैव चारुत्वं।। गुरु
जननियंत्रिताहं नरेंद्रं द्रष्टुं न गतवत्यस्मीति व्यंग्यार्थस्याचारुत्वं।। यत्र काव्यार्थांतरमाक्षिप्यते तत्रापि
गुणीभूतव्यंग्यमेव।। यथा।। पिअसहिकिहेसुमुहिआरखो णिलच्छिसरसइमभम्न।। यंयोव दुमं णेइसोण
णाहे गुणविसेसं णो।। प्रियसखि कथय कस्तो पी लक्ष्मीसरस्वतीमध्ये।। यां यो वृद्धमन्यते स नरनाथो विशे ११
षज्ञाः अत्र कस्तोपी समधिक इति काकुकल्पनया अधिक्षणनमवतीति व्यज्यते।। चित्रं तु काव्यं शब्दार्थालंकाराच्चित्र

तथा बहुविधं तस्य चोप्यलंकारप्रकरणे प्रवक्ष्यति। अत्र महाकाव्यादयः प्रबंधा निरूप्यंते। नगरार्णवशैलर्तुचं
द्रार्कोदयवर्णनं। उद्यानसलिलक्रीडा मधुपानरतोत्सवाः। विप्रलंभो विवाहः कुमारोदयवर्णनं॥ मंत्रद्यूतप्र
याणाजिनायकाभ्युदया अपि। एतानि यत्र कथ्यंते तन्महाकाव्यमिष्यते। तत्त्रिविधं। गद्यमयं। पद्यमयं॥ उ
भयमयं चेति। आवादः पदसंघातो गद्यं पद्यं चतुष्पदं। आसर्गबंधमपि यद्रूपकाव्यमुदीर्यते। गद्यपद्यमय
काव्यं चंपूरित्यभिधीयते। वक्त्रं चापरवक्त्रं च सोच्छ्वासत्वं च भेदकं। वर्ण्यते यत्र काव्यज्ञैरसावाख्यायिका मता।
यत्र वक्त्रापवक्त्रनामानौ वृत्तविशेषौ न वर्ण्येते सापि च्छासपरिच्छिन्नाख्यायिका। हर्षचरितादि। अथ क्षुद्रप्र
न्यानिरूप्यते। येन केनापि तालेन गद्यपद्यसमन्वितं। जयत्युपक्रमं मालिन्या प्रासचित्रितं। तदुदाहरणं
नाम विभक्त्यष्टकसम्मितं। यत्र जयेत्युपक्रमं मालिन्यादिवृत्तरम्यं पद्यं निगद्यते। अनंतरमपि चेत्युपक्र
माणि जगत्वाक्यानि सप्रासानि प्रतालानि प्रतिविभक्ति निबध्यते। अनंतरं विभक्त्याभासता सा तदुदाहरणं
संबोधनविभक्त्यायस्तदुरं पद्यं पूर्ववत्कं विमुक्तानि सप्रासानि सतालानि प्रतिविभक्ति निबध्यते। अनंतरं वि
भक्त्याभाविमुक्तपुनरावृष्टशब्दस्यो चेत्कवालकं। जाद्यंतपद्यसंयुक्ता संस्कृतप्राकृतात्मिका। अष्टाभिर्वा चतु
न्य र्भिर्वा वाक्यैस्कंधैः समन्विता। प्रतिस्कंधविभिन्नवाक्यरीतिर्देवनपोचिता। सर्वतोदेवताद्यादिरेषा भोगावती
मुग्धा। मता। वर्ण्यनामांक कचित्तु दावर्णेन प्रचुरोज्ज्वला। वाक्याडंबरसंयुक्ता सा मता विरुदावली॥ तारापं
संख्यया पद्यैर्युक्ता तारावली मता। एवं कुविप्रोदोलिकासिद्धाः क्षुद्रप्रबंधा यथासंभवमूह्याः। अथ तेषामुदाहर
णानि विस्तरभियादिह नोक्तानि॥ इति विद्यानाथकृतौ प्रतापरुद्रयशोभूषणे ऽलंकारशास्त्रे काव्यप्रकरणं स

मात्तं॥ अथ नाट्यप्रधानाः प्रबंधा निरूप्यंते॥ चतुर्विधैरभिनयैः सात्विकांगिकपूर्वैः॥ धीरोदात्तव्यवस्थानुकृति
र्नाट्यं रसाश्रयं॥ भावाश्रयं तु नृत्यं स्यान्नृत्तं ताललयाश्रयं॥ एषां दशरूपोक्ता प्रक्रिया॥ नृत्यनृत्तयोर्नाटकांगत्वादि
हस्वरूपनिरूपणं कृतं॥ तथोक्तं दशरूपके॥ मधुरोद्धतभेदेन तद्द्वयं द्विविधं पुनः॥ लास्यतांडवभेदेन नाटकाद्युप
कारकं॥ तेन नाट्येन दशरूपकाणि भवंति॥ नाटकं सप्रकरणं भाणः प्रहसनं डिमः॥ व्यायोगसमवकारौ वीथ्यंकेहा
मृगा अपि॥ नाट्याश्रयत्वे नाटकेद इति दशकान्युच्यते॥ वस्तु नेत्ररसास्तेषां रूपकाणां हि भेदकाः॥ वस्तु त्रिविधं॥
प्रख्यातमुत्पाद्यं मिश्रं चेति॥ तथोक्तं दशरूपके॥ प्रख्यातोत्पाद्यमिश्रत्वभेदात्त्रिविधं मतमिति॥ इतिहासनि
बंधनं प्रख्यातं॥ कविकल्पितं संकरं मिश्रं चेति॥ एवमादि वस्तुभेदान्नायकभेदात् रूपकाणां परस्पर
श्रित भेदः॥ तथाहि॥ नाटके मिति वृत्तं धीरोदात्तनायकः॥ शृंगारवीरयोरन्यतरप्राधान्यं॥ अन्येषां रसाना
मंगत्वेनानुप्रवेशः॥ प्रकरणे उत्पाद्यमिति वृत्तं धीरशांतनायकः॥ शृंगाररसस्यैव प्राधान्यं॥ भाणे धूर्तो विटो
नायकः॥ उत्पाद्यमिति वृत्तं॥ शृंगारवीरयोः सूचनमात्रसारता॥ प्रहसने कल्पितमिति वृत्तं॥ पाषंडताप त
सधूर्तयो नायकाः॥ हास्यरसप्रधानं॥ डिमे प्रख्यातमिति वृत्तं॥ देवगंधर्वराक्षसपिशाचाद्यो धीरो
द्धतनायकाः षोडश॥ रौद्ररसप्रधानं हास्यशृंगारयोरप्रवेशः॥ व्यायोगे प्रख्यातमिति वृत्तं धीरोद्धतो
नायकः॥ वीररसप्रधानं॥ समवकारे कल्पितमिति वृत्तं शृंगाररसस्य सूचनामात्रसारता॥ वीथ्याम
भि मिश्रितमिति वृत्तं धीरोद्धतो नायकः शृंगाररसस्य सूचनामात्रसारता॥ अंके प्रख्यातमिति वृत्तं प्राकृत
जनो नायकः करुणरसप्रधानं॥ ईहामृगे मिश्रितमिति वृत्तं धीरोद्धतो नायकः॥ शृंगाररसस्याभासत्वं॥ क १२
ल्पितमिति वृत्तं॥ अथ तेषां सामग्री निरूप्यते॥ तत्र पंच संधयः॥ तथोक्तं दशरूपके॥ मुखं प्रतिमुखं गर्भः

सविमर्शोवसंहृतमिति॥ संधिर्नामएकेन प्रयोजनेनान्वितानां कथांशानामवांतरप्रयोजनसंबंधः॥ तत्रारंभ
बीजसंबंधो मुखसंधिः॥ यत्नबीजसंबंधः प्रतिमुखसंधिः॥ प्राप्त्याशाप्रकातयोः संबंधो गर्भसंधिः॥ नियताप्ति प्त्या
कार्ययोः संबंधो विमर्शसंधिः॥ फलागमकार्यसंबंधो निर्वहणसंधिः॥ तयोक्तं दशरूपके॥ बीजं बिंदुः पताका
ख्यप्रकारोकार्यलक्षणं॥ आरंभयत्नप्राप्त्याशानियताप्तिफलागमाः॥ अर्थप्रकृतयः पंच पंचावस्थासमन्वि
ताः॥ यथासंख्येन जायंते मुखाद्याः पंच संधयः इति॥ आरंभादीनां लक्षणमुच्यते॥ औत्सुक्यमात्रमारंभः फलला य
भायभूयसे॥ प्रयत्नस्तु फलेप्राप्तौ व्यापारोतित्वरान्वितः॥ उपायापायशंकाभ्यां प्राप्त्याशाकार्यसंभवः॥ अपायाभा
वतः कार्यनिश्चयो नियताप्तिका॥ सामग्रीफलसंपत्तिः फलागम उदाहृतः॥ अथ बीजपंचकं निरूप्यते॥ स्तो
कादिष्टः कार्यहेतुः बीजं विस्तार्यतेनकधाप्रवांतरार्थविच्छेदे बिंदुरच्छेदकारणं॥ प्रतिपाद्यकथांगस्या सपताका
व्यापिनी कथा॥ अव्यापिनी प्रकरिका कार्यनिर्वाहकं फलं॥ मुखं बीजसमुत्पत्तिः नानार्थरससंभवा॥ अं
गानि द्वादशैतस्य बीजारंभसमन्वयात्॥ बीजारंभानुगुण्येन मुखसंधेरंगानि प्रयोक्तव्यानि॥ उपक्षेपप
रिकरः॥ परिन्यासो विलोभनं॥ युक्तिः॥ प्राप्तिः॥ समाधानं विधानं परिभावना॥ उद्भेद भेद करणान्यन्वर्थानि य
थाक्रमं॥ एषां स्वरूपं निरूप्यते॥ बीजन्यास उपक्षेपः बीजस्य बहुलीकरणं परिकरः॥ बीजनिष्पत्तिः परिन्या
सः॥ बीजगुणवर्णनं विलोभनं॥ बीजानुकूलप्रयोजनसंघटनाविचारो युक्तिः॥ बीजसुखागमप्राप्तिः॥ बी
जसंनिधानं समाधानं॥ बीजसुखदुःखहेतुर्विधानं॥ बीजविषयोत्कप्रयावेगाः परिभावनं॥ गूढबीजप्र
काशनमुद्भेदः बीजानुगुणप्रस्तुतकार्यारंभः करणं॥ एतानि द्वादश मुखसंधेरंगानि॥ एतेषां मुखे उपक्षेपप

रिकर परिन्यासयुत्युद्भेदसमाधानानामावस्यकत्वं॥ अथ प्रतिमुखं॥ लक्ष्यालक्ष्यस्य बीजस्य व्यक्तिः प्रतिमुखं मतं॥
बिंदुप्रयत्नाभिगमादंगान्यस्य त्रयोदश॥ बिंदुप्रयत्नानुगुण्येन प्रतिमुखस्यैतेंऽगानि प्रयोक्तव्यानि॥ विलासः
परिसर्प्पश्च विधूतं शम नर्मणी॥ नर्मद्युतिः प्रगमनं निरोधः पर्युपासनं॥ वज्रं पुष्पमुपन्यासो वर्णसंहार इ
त्यपि॥ एतेषां स्वरूपं निरूप्यते॥ संभोगविषयमनोरथो विलासः॥ दृष्टनष्टपदार्थानुसरणं परिसर्प्पः॥
अनिष्टवस्तुविक्षेपो विधूननं॥ अरंस्तु प्रशमनं शमः॥ परिहासवचनं नर्म॥ अनुरागोद्घाटनोत्था प्रीतिर्नर्मद्यु
तिः॥ उत्तरोत्तरवाक्यैरनुरागबीजप्रकाशनं प्रगमनः॥ छलनाभिप्रेतागमननिरोधनं निरोधः॥ क्रुद्धजनानु
नयः पर्युपासनं॥ प्रमुखनिष्ठुरवचनं वज्रं॥ अनुरागप्रकाशनविशिष्टवचनं पुष्पं॥ अनुरागहेतुवाक्यव
चना उपन्यासः॥ चातुर्वर्ण्यनिवर्णनं वर्णसंहारः॥ एतेषां मध्ये परिसर्प्यप्रगमवज्रोपन्यासपुष्पाणां प्रा
धान्यं॥ अथ गर्भसंधिः॥ गर्भस्तु दृष्टनष्टस्य बीजस्यान्वेषणं मुहुः॥ पताकाप्राप्त्यागाभिगमात्गर्भसंधि
रंगानि प्रयोक्तव्यानि॥ अभूताहरणं मार्गो रूपोदाहरणे क्रमः॥ संग्रहश्चानुमानश्च तोटकाधिबले तथा॥ उ
द्वेगसंभ्रमाक्षेपाद्वादशांगान्यनुक्रमात्॥ एतेषां स्वरूपं निरूप्यते॥ प्रस्तुतोपयोगिच्छद्माचरणमभूताहरणं॥
तत्त्वानुकीर्त्तनं मार्गः॥ वितर्कमप्रतिपादनं वाक्यं रूपं॥ प्रस्तुतोत्कर्षेणाभिधानमुदाहृतिः॥ संचिंतितार्थप्रा
प्तिः क्रमः॥ प्रस्तुतोपयोगिसमाधानवचनं संग्रहः॥ लिंगाद्यभ्यूर्ज्जग्रहणमनुमानं॥ रोषसंभ्रमवचनं तो
टकं॥ दृष्टजनातिसंधानमधिबलं॥ अपकारिजनाद्भयमुद्वेगः॥ शंकात्रासौ च संभ्रमः॥ इष्टोपायानु १२
सरणमाक्षेपः॥ एतेषां मध्ये अभूताहरणमार्गतोटकाधिबलाक्षेपासंगप्राधान्यं॥ अथ विमर्शसंधिः॥

गर्भसंधौप्रक्षिप्तस्य बीजार्थस्यावमर्शनं। हेतुनायेनकेनापि विमर्शसंधिरिष्यते। नियताप्तिं प्रकुर्युस्तेरंगान्यस्य त्र-
योदश॥ नियताप्तिप्रकर्षानुगुण्येन विमर्शसंध्यंगानि प्रयोक्तव्यानि। तत्रापवादः संफेटो विद्रवद्रवशक्तयः॥
द्युतिः प्रसंगछलनं व्यवसायो विरोधनं॥ प्ररोचनाविचलनमादानं च त्रयोदश॥ एतेषां स्वरूपं निरूप्यते॥ दो-
षप्रख्यापनमपवादः। दोषसंभाषणं संफेटः॥ वधबंधादिकं विद्रवः। गुरुतिरस्कृतिर्द्रवः॥ विरोधशमनं
शक्तिः॥ तर्जनोद्वेजने द्युतिः। गुरुकीर्तनं प्रसंगः॥ अवमाननं छलनं॥ स्वशक्तिप्रसननं व्यवसायः॥ क्रोध-
संरब्धानामन्योन्यविक्षेपो विरोधनं॥ सिद्धवद्भाविनिर्णयः प्ररोचनं॥ स्वगुणाविष्करणं विचलनं॥ कार्यसंग्र-
हणमादानं॥ अथ निर्वहनसंधिः॥ बीजवंतो मुखाद्यर्था विप्रकीर्णा यथायथं॥ एकार्थमुपनीयंते य-
त्र निर्वहनं हि तत्॥ फलागमाप्तिकार्यानुगुण्यादंगान्यस्य चतुर्दश॥ एतेषां स्वरूपं निरूप्यते॥ संधिर्विरोधो ग्रथ-
नं निर्णयः परिभाषणं॥ प्रसादानंदसमयाः कृतिर्भाषोपगूहने॥ पूर्वभावानुसंहारौ प्रशस्तिश्च चतुर्दशेति॥
बीजोपगमनं संधिर्विरोधः कार्यमार्गणं॥ कार्योपक्षेपणं ग्रथनं॥ बीजानुगुणकार्यप्रख्यापनं निर्णयः॥
मिथो जल्पनं परिभाषणं॥ पर्यवसादनं प्रसादः॥ वांछितार्थप्राप्तिरानंदः॥ दुःखप्रशमनं॥ समयः॥ लब्ध-
स्थिरीकरणं कृतिः॥ प्राप्तिकार्यानुमोदनं भाषणं॥ अद्भुतार्थप्राप्तिरुपगूहनं॥ दृष्टकार्यदर्शनं पूर्वभावः॥
कार्यार्थोपसंहृतिः संहारः॥ शुभशंसनं प्रशस्तिः॥ एवं चतुःषष्ट्यंगसमन्विताः पंचसंधयः प्रतिपादिताः॥
एतेषां षट् प्रयोजनानि संभवंति॥ अविवक्षितार्थप्रतिपादनं॥ गोप्यार्थगोपनं॥ प्रकाश्यार्थप्रकाशनं॥
अभिनयरागसमृद्धिः॥ चमत्कारित्वमिति॥ तत्र सूचनक्रमः॥ तथोक्तं दशरूपके॥ विष्कंभचूलिकाक-

स्य प्रवेशांगं कावतारणेरिति।। एषां स्वरूपं निरूप्यते।। वृत्तवर्तिष्यमाणानां निदर्शनं।। संक्षेपार्थस्तु विष्कंभो
मध्यपात्रप्रयोजितः।। स च द्विविधः शुद्धः संकीर्णश्चेति।। केवलं संस्कृतप्रायः शुद्धः।। संस्कृतप्राकृतमि
श्रः संकीर्णः।। अथ चूलिका।। अंतर्यवनिकासंस्थैः चूलिकार्थस्य सूचना।। यत्र मनपथ्यगतैः पात्रैरर्थः
सूच्यते सा चूलिका।। अथांकास्यं।। अंकांतपात्रैरंकास्यमुत्तरांकार्थसूचना।। यत्र पूर्वांकांतपात्रैरुत्तरांका
र्थः सूच्यते तदंकास्यं।। अथ प्रवेशकः वृत्तवर्तिष्यमाणानां निदर्शकः।। प्रवेशकस्तु नाटांकेनीचपात्रप्र
योजकः।। नीचप्रयुक्तः प्रवेशकः।। स चाद्यंके न प्रयुक्तः।। अथांकावतारणं।। यत्रस्यादुत्तरांकार्थः पूर्वांकार्था
नुसंगतः।। प्रसक्तिर्तांकपात्रैस्तु तदंकावतरणं मतं।। एभिः संसूचयित्वा द्रष्टव्यमर्थं प्रदर्शयेत्।। अत्रांक
स्वरूपं निरूप्यते।। प्रत्यक्षनेतृचरितो बिंदुव्याप्तिपुरस्कृतः।। अंको नानाप्रकारार्थसंविधानरसाश्रयः।।
अथ मुखं निरूप्यते।। सूत्रधारो नटीं ब्रूते मारिषं वा विदूषकं।। स्वकार्यप्रस्तुताक्षेपी चित्रोक्त्या यत्तदामु
खं।। प्रस्तावना वा तत्र स्यात्कथोद्घातः प्रवर्तकं।। प्रयोगातिशयश्चेति त्रीण्यंगान्यामुखस्य हि।। एषा
मंगानां स्वरूपं निरूप्यते।। स्वेतिवृत्तसमं वाक्यमर्थं वा यत्र सूत्रिणः।। गृहीत्वा प्रविशेत्पात्रं कथोद्घातो द्वि
धैव सः।। प्रस्तुयमाण कालस्य गुणवर्णनया सतः।। प्रविशेत्सूचितं पात्रं यत्र तं स्यात्प्रवर्तकं।। एषोयमि
ति सुप्रक्षेपात्सूत्रधारप्रयोगतः।। पात्रप्रवेशो यत्रायं प्रयोगातिशयो मतः।। वीथ्यंगान्यामुखांगत्वा
दुच्यंतेत्रत्व तावतः।। उद्घात्यकावलगिते प्रपंचत्रिगते छलं।। वाक्केल्यधिबले गंडमवस्यंदितनो १४
लिके।। असत्प्रलापव्याहारमृदुवानि त्रयोदश।। एतेषां स्वरूपं निरूप्यते।। ग्रंथार्थपदपर्याय्य मालारूपेण

उत्खास्यक द्विविधं। जावलारि तमपि द्विविधं।। अन्यकार्यछलनान्यकार्यकरणं।। अन्यकार्यप्रसंगात् प्रकृत
कार्यसिद्धिः। अतभ्रूतं मिथस्तोत्रं प्रपंचपूर्वरंगेच दीप्तिः साम्यादने कार्यं कृत्रिगतं। प्रियसदृशौ वा भैवरास्त्रिये
र्विलोभनं छलं। साकांक्षस्यापि वाक्यस्य निर्वृत्तमानुसत्तिवा केलिर्द्विविधा। स्पर्द्धयान्योन्यवाक्याधिक्यं
अधिबलं। सहसोदितं। प्रस्तुतविरोधिगंडं। रसवशादुक्तान्यथाख्यानमवस्कंदितं। सोपहासनिगूढार्थोप्र
हेलिका नालिका। असंबंधकथाप्रायः प्रलापः। अन्यार्थे हास्यलोपकरणवचनं व्याहारः।। दोषाणां गुणव
प्रतिपादनं मृदवः।। एतेषां मध्ये यथासंभवं कानिचिदंगानि प्रयोक्तव्यानि। अथ दशरूपकानां स्वरूपनि
रूप्यते। संगेमुखप्रतिमुखगर्भविमर्शोपसंहृतेः।। दर्णप्रकृतिरन्येषामाधिकारिकवृत्तांतः।। वीरशृंगारयोरेकः
प्रधानं यत्र वर्ण्यते। प्रख्यातनायकोपेतं नाटकं तदुदाहृतं।। तत्र नांदीस्वरूपं निरूप्यते। अर्थतः शब्दतो वापि
मनाक्काव्यार्थसूचनं। यत्राष्टभिर्द्वादशभिरष्टादशभिरेव वा। द्वाविंशत्यापदैर्वापि सा नांदीति प्रकीर्त्यते। अत्र
चनाटकादिरूपाणामादौ विहितं पद्यं नांदी सूच्यते। किंच रंगप्रसादने नांदी नांदी प्रवेशोऽपि महेश्वरस्य रंगत्वमा
दौखलुखे जगाम।। तदंगमुद्दिश्य कृतां तत्पूजां नांदीति तन्नाट्यविदो वदंति। वेणीसंहारे अष्टादशपदा नांदी
उन्मत्तराघवे द्वादशपदा नांदी। बालरामायणे। द्वाविंशतिपदा नांदी। केश्चिन्नांद्याः पदनियमानापेक्षितः।।
कालिदासेन वाक्यार्थः पदसेनांगीकृतः। शांतलोऽष्टपदी नांद्यनंतरं प्रविष्टेन सूत्रधारेण पुरस्सरं भार
तीरस्य शृंगारश्लोकैः काव्यार्थः सूचनीयः।। तथोक्तं दशरूपके। रंगप्रसाद्यमधुरैः श्लोकैः काव्यार्थसूचकैः
ऋतुं कंचिदुपादाय भारतीं वृत्तिमाश्रयेत्। इति। एषा प्रक्रिया नाटकस्यैव मुख्या।। अथ प्रकरणं।। उत्साद्ये

नेतिवृत्तेनधीरशांतिप्रधानकं॥शेषंनाटकवत्सर्वंसवेसप्रकरणंहितत्॥अथभाणः॥भारतीवृत्तिप्रायःस्वत्रशौर्य
सौभाग्यसंस्तवैः॥सूच्यतेवीरश्रृंगारौविटेननिपुणोक्तिना॥कल्पितेनेतिवृत्तेनधूर्तचरित्रवर्णनं॥एकांकोमुख
निर्वहेयत्रभाणःसःसंमतः॥अथप्रहसनं॥यत्रसंध्यंगलास्यांगवर्णनंभाणवन्मतं॥हास्योरसप्रधानःस्यात्तद्वैप्र
हसनंमतं॥तत्त्रिविधं॥शुद्धंवैकृतंसंकीर्णंचेति॥तत्र॥शुद्धंपाषंडविप्रादिचेटचेटीविटाकुलं॥वेषभाषादिसंहि
तंयुद्धंहास्यवचोन्वितं॥अथविकृतं॥कामुकानांवचोवेषैःषंडकंचुकितापसैः॥प्रहासाभिनयप्रायंविकृतंतत्
प्रकीर्त्यते॥तद्विध्यंगैःसमाकीर्णंसंकीर्णंधूर्तसंकुलं॥अथडिमः॥यत्रवस्तुप्रसिद्धंस्याद्वृत्तयःकैशिकींविना॥नेता
रोदेवगंधर्वयक्षरक्षोमहोरगाः॥भूतप्रेतपिशाचाद्याःषोडशात्यंतमुद्धताः॥हास्यश्रृंगाररहितारसारौद्रप्रधा
नकाः॥चत्वारोंकाःसंधयश्चचत्वारोमवर्जिताः॥महेंद्रजालसंग्रामसूर्येंदुग्रहादयः॥शेषंनाटकवत्सर्वं
सद्भिःपरिकीर्त्यते॥अथव्यायोगः॥यत्रख्यातेनिवृत्तंस्यादुद्धतोनायकोमतः॥गर्भावमर्शरहितःस्याद्डिमवद्
सपोषणं॥एकवासरकार्यंचसंख्यायोगोमहारणः॥अथसमवकारः॥यत्रामुखेनाटकवत्संधयोमर्शवर्जिताः
नेतारोद्वादशख्याताःफलादेवासुरादयः॥वीरप्रधानाःश्चरसा॥अंकोस्त्रिषुचक्रमान्॥वस्तुप्रभावदेवारिकृतास्त्रु
कपटास्त्रयः॥पुरोधरणंग्रादिनिमित्ताविद्रवास्त्रयः॥धर्मार्थकामानुगुण्यात्तिस्त्रःश्रृंगारीतयः॥प्रथमें
कैपिवर्द्धव्याकुपाख्यामस्यावधिः॥यानावधिर्द्वितीयंकेतृतीयंकेद्वयामिका॥अस्मोसमवकारःस्याद्विध्यगैः
कैश्चिद्वन्वितः॥अथवीथी॥यत्रभाणवद्रंगानांगुप्तिर्वृत्तिस्तुकैशिकी॥श्रृंगारोपरिपूर्णत्वात्सूचनीयोतिभूयसा॥ १५
उद्घात्याद्दीनिचांगानिसवीथीविधिवन्मता॥अथांकः॥यत्रेनिवृत्तंप्रख्यातंप्रधानेकरुणोरसः॥स्त्रीणांविल

सोवाग्युदं नेतारः प्राकृता नराः ॥ मानवत्सेविवध्यादिस उत्सवांगसंश्रितः ॥ अथेहामृगः ॥ मिश्रईहामृगे वृत्तमत्र
तुरंकं त्रिसंधिकं ॥ मर्त्यदिव्यौ च नियमान्नायकप्रतिनायकौ ॥ धीरोद्धतः स्त्रियं दिव्यां हर्त्तुंकामो च कामुकी ॥ अव
धंयुद्धमन्योन्यमाभासरसयोस्तयोः ॥ एषा प्रक्रिया दशरूपकोक्तस्यानुसारेणात्र सामनाटकमुदाह्रियते ॥
भद्राकौतुकवेदिमागतोरन्योन्यमासेदुषो दोले मेरुहिमाचलप्रभृतिभिर्दैवैर्हरिंद्रादिभिः ॥ व्यात्तानूपार्श्व
युगे पुरो वृजमुवाप त्र्याम्बमेनादिभिः साध्वीभिः शिवयोरपांगसरणीवैवाहिकी पातु वः ॥ एषा द्वाविंशतिप
दानांदी ॥ अस्या विवाहप्रवृत्तयोः शिवयोर्वर्णयास सकलनरेंद्रपरिकरस्य प्रतापरुद्रस्य काकतीयलक्ष्मीः
प्राप्तिं नाटकप्रयोजनरूपा किंचिदर्थशात्म्यां सूचिता ॥ ऐस्यानुसिद्धिर्महालक्ष्मीजगद्दृष्टाधुरंधरा ॥ विष्णुव
क्षस्फुरन्माविगतालयतोरणा ॥ एषा नांदी प्रतापरुद्रराज्यलक्ष्मीमंगलविधिलक्षणा ॥ नांद्यंते सूत्रधारः ॥ सं
मंतादवीतिवाक्य ॥ कथनास्तत्रित एव समनंतरो रंगमंगविधिः ॥ तथाहि ॥ आविष्कुर्वंति मुरजो सर्वतः शब्द
माधुरीं ॥ संगीतोपनिषद्दिव्या वीणाप्रस्तावइत्यमुः ॥ एतद्रंगप्रसाधनं ॥ सप्रहर्षं ॥ भूभृत्सुता महादेवो
पितरौ यस्य विश्रुतौ ॥ नरनागाकृतिश्रीमान्सदेवश्रेयसेस्तु वः ॥ ओध्वमवलोक्य चिरादनुकूलेन कालेनोप
गतर्दुर्विनातनि दिङ्मुखानि ॥ विहरद्राजहंसश्रीर्विलसन्मित्रमंडलः ॥ प्रकाशयति सन्मार्गं प्रसन्नस्थिर
दागमः ॥ काव्यार्थसूचकाभ्यां ऋतुसमाश्रयणेन संस्कृतत्रायनराश्रितवाग्व्यवहाररूपासारतौकृषि
ता ॥ सविनयमुपसृत्य सभाभिमुखं ॥ अंजलिं बध्वा ॥ भो भो भुवनभागधेयविवर्त्तस्य एकशिलानगर
पुण्यपुरा ॥ काकतीयकुलदेवतायाः स्वयंभूदेवस्य सांबस्य सततमहोत्सवमेवाद्य नासिदिवंसो विद्वांसः के
लाणवनाग्नवेदाचार्यस्य पुत्र नत्तिनयदर्प्पणममात्ति मतरूपकप्रयोगानुज्ञया परमेनुगृहीत ॥ जाको

द्योकूर्णं दधात्विकं श्रयेयस्मिन् जगन्मंगलमस्ति वस्तु यस्मै स्वयं प्रस्पृहयत्यजस्रं।। नत्रात्रयोर्लोचनयोः पंथाः मं
गाटकं मा चिरस्तु इति सहर्षं।। जस्मन्मनोरथसंवाद्धे वपारिषदादेशः।। यत्र तापरुद्रचरितानुबंधः सामाजिका
मनसि वर्त्तते।। अहो सर्वे सुघटितमनुविधात्राधात्रायतः।। सभास्वयंभूपरमेश्वरस्य प्रतापरुद्रस्य गुणा
महार्घाः।। अहं चनाद्यमृतपारदृश्वासुधासुचस्य कवेमुखवाचः।। एषा प्रेक्षकस्य याभिमतरूपाया भारती
वृत्तेरंगं प्ररोचना।। सविमर्शं।। कथमस्मत्प्रेयसी संगीतसारिका चिरायति।। प्रविश्य नटी।। पुरोवलोक्य सस्पृहं।।
किंभारइ एसंबद्धुमंजरिरवो सभाए विहरंतीए।। अहं संगीसुरं वा वीणादं णटं पमुहं नुं जतीणाओ।। एतत्सा
म्यादनेकार्थयोजनरूपं विगतं।। प्रस्तावनांगं।। उपसृत्य।। इयम्हि।। आणवेदु को णिंओओ मुणुचि
दीयदु त्ति।। सूत्रधारः।। यद्देकूर्णलकूर्णनालमधुरं गास्वामिगीतिं कूवांलरस्यं चारु निरंगदारललिते
रा विश्रुतिष्यामि यत।। रम्यं यत्किलरंगमंगलविधिं संपादयिष्याम्यहं प्राग्गिसृलवत्तितदथ निपुणो निर्व्यूढमेव
त्वया।। एतस्मिन्प्रियसेहरोरवप्रिये वाक्ये रूपालंभाछलनं।। नटी।। समर्ये।। नटसामंगीसजिका दुविलं वि
जसंजीकूजारुकुपसाके ण उण रूपए णप जोजो उवंकृनि।। अदु।। सूत्रधारः।। नन्वीयमेव निरूपयसि
ति एन्त्रिकादहाति।। नटी।। गहीवा संस्कृतमाश्रित्य वाचयति।। नेजमपर्य्याय हरयो।। किंकिं संबोधयन्मतं।।
किमाशीर्वादविषयो विद्यानाथकृतिम्प्रक्रा।। नटी।। समंदस्मितं।। निगदंत्री घुएसाए दं सोऊणं पडिहाउ।।
किंपिसं उत्तरे निरूवेद अओ।। सू।। अयि सुव्यक्तमेतत्प्रतापरुद्रकल्याणमिति प्रतीयत एव।। एषा निग
दा चोनालिका।। नटी।। कहं कहं णा अअणामहे।। जाणबंधण्णामनोहरं खुणा भणुअं।। पञा बपद् १९
किरंकहंतं सरं णाणामजाअंबुद्धीजादि।। सू।। प्रियेश्रूयतां।। तंसजातं समुद्दीर्घ्यं सोणिर विमिबोदि

तो॥ प्रतापरुद्र इरस्यास्मकरो लोकनीश्वरः॥ अन्यच्च॥ विद्वद्भिर्विशेषो॥ वीरस्य काकतीयकुलेस्थितं॥ अवतार
ममेज्ञात्वा वीररुद्रं प्रवक्ष्यते॥ नटी॥ लोअणकं णज्जु अलंसागा॥ अहे एण एदं णामजुप्पलं॥ मुक्तिप्रदि॥
चिरं सनंटविं जाण पटपंफलिअं॥ जेण लोअणिंग लंकाकइ न्पारिंदचरिअं प्पहर्पिंजए॥ एतन्ना
ध प्रसंगेन॥ प्रकृत कार्यावलगनादवलगितं॥ सू॥ अहो प्रश्नासेवादो धमाय्युष्मत्या नं दीयं कवीनो
प्रश्नोत्तरमालिका॥ यथा॥ किं लोके भवसौभाग्यं मंगलं भवणं सह॥ किं मंगलं प्रस्तावां करुद्रस्य चरित्ता
दुतौ॥ एतत्प्रश्नोत्तरमालारूपमुद्घाटयकं॥ नटी॥ अंअ परिजणो संबसंचटी अदि॥ सू॥ आयेत्वया दा
रेहृदारश्रीनाटयसंपदि यं सम्नः प्रबंधलक्ष्मीरियेव विदग्धपुणतिस्पृहा॥ एवमियत्तोत्रद्रूपः प्रपञ्चः
नटी॥ एआरिस उगुणमहं घंमि अज्जा वरुदचरिअं अहिणअरं॥ तं सत्तं सकइणो रससंरं यसादो॥
सू॥ आ एएवमेव॥ नन्वेषा कविभारत्यो भ्याके कलिं॥ यथाकरुणां भीरतीवल्सर्कितवद्वपां ग्वाचेद्य
किं प्रस्तुतजिव्हाकाकतीररुद्रनृपतेस्तोत्राय सन्नह्यति॥ ज्ञातं तेविहरन्नुवाग्मय रससंध्या नट
धरउजेतिसंगम्नोलितरंगिणी कलकलारंभप्रियं भावुकाः॥ एषाप्यन्योन्यसंल्लापरूपावाक्केकली
नटी॥ अंज्ञाणां एआरिसणारंदचरिअण अस्वो नंटउं वत्तेहोइ णावेइ सभ्भसेण वेव इमेण्पि अज्जं॥ सू
किंचिलासस्यं॥ आः किमुच्यते॥ निरवद्यानन्तुविद्यासामश्रीकृद्गृपाः पुनस्तवगीतयोग्यताद्याभवि
ष्यति॥ नटी॥ संगीअसारं सम हं णावो तुइं वेलिज्जइ॥ अत्रं धारणा जाणयंतं अस्ते हेतुपंजो॥ एतदन्यो
न्यवाक्याधिक्यानञ्चाधिवलं॥ सू॥ चिरमवहिलएवास्मि॥ नन्वियमनुपगम्यते॥ धूवा॥ नटी॥ कत्त

कथं गगनप्रस्तावचनसे अमोदितमितिगण्यं ॥ नटी ॥ सस्मितं ॥ अयि कथनं घोत्तए वत्सराना दयविद्धे
त्तिविद्धोखं नज्जि चत्ति ॥ एतदुलक्ष्योन्यथायोजनरूपमवस्पंदितं ॥ जायेनत्तं ॥ ग नो सकृत वचेत ॥ तदा
रभ्यतं संगीके ॥ नटी ॥ तधा करोत्ति ॥ लक्षिसरधं सइमाधवलि अभुवं णं जन्तराविअं हंति ॥ विज
सेत्ति कुवलअस दिराअं पसाहणी कुणइ ॥ सू ॥ आकर्ण्य सरसावेशो गाढालिंगनसमुदं प्रसपर
गलतें सुधां सिंच ॥ कुवां करोमि सवोंगेभ्यो त्रे कोमितवर्षिणीं ॥ एवं रसवक्रादसंगता चेष्टा हारे रूपा
लापहोसे ॥ सूनुनरास्खु एसा अकोसविंगद ॥ आलिंगनाचेसणोणसेहउ ॥ एषो हास्यलोभ कुरु णो व्याह
र ॥ सू ॥ सव्रीडं रसास्वादे न तरलायेनाधंति विपाश्रित ॥ तए वत्सानुकालो वकु सवंति हृदयालव ॥ एल
दोषस्य गुणतारोपामृदवे ॥ नटी ॥ अअअणं तरकरणिं जिणिरपेदु ॥ नन्विवमिदानीं सभापतिस्वयं
करूपभ्रोक्यते ॥ सर्वोंगभिल्लिस सर्वमंगलालंकृताङ्गते ॥ रुद्रस्य महिमा भाति विम्बानुग्रहकारिणः ॥ ने
पथ्ये ॥ भो भो सस्रंसस्खे ॥ सर्वांगिणास र्वमंगलालेकृतिरेवा पर्वविरुद्रइति ॥ सू ॥ सहर्षं ॥ कथमुपकालमेवा
स्मद्दाक्यानुगुण्ये न प्रस्तुतस्यानुगुणं कुशले ॥ कुशिलवे ॥ यतः ॥ काकतीयगुणवर्णे नायोपगतयोर्वै
तालिकयोर्वचनमिवोपक्षिप्यते ॥ प्रयंकयो द्वातः ॥ इदमेव गुणवर्णनात्प्रवृत्तकम् ॥ कथमेतौ वै
तालिकावीतए वाभिवर्त्तते ॥ एषो यमिति प्रतिक्षेपा स्त्रयोगातिशय ॥ प्रेस्तार नोगो ॥ नदहा वाम
ष्पनंतरकरणीं वा यसज्जिसवा वइत्ति निष्क्रांतौ इति समभ्रांगता प्रस्तावना ॥ ततः प्रविशतः काविकृस्यक १८
मलो वैतालिको प्रथमः ॥ सहर्षं ॥ योयं जातस्त्रिलोकी प्रथितसुचरितः काकतीयान्वयो यस्मै श्रेयो स्य
जस्त्रं वितरति भगवान्देवदेवः स्वयंभू ॥ यस्याज्ञा सर्वपृथ्वीपतिमुकुटमणिश्रेणिकेली वयस्यो सो

येमपालमौलिर्जयतिगुणमहोरुद्रदेवो नरेंद्रः।। स्वयंप्रभदेवात्रेयो वितरणरूपबीजन्यासादुपक्षेपांगं।। द्वि।। यो
रुद्रोऽरजतस्वलक्ष्मीतिनगादंगीगनारी पुरा सा यस्य प्रतिकाकतीश्वरकुले सर्वांगनातिस्थितः।। स्थानेयद्दिव
मावलोकनकलामात्रेणपास्मीकृता यास्स्वैरिपुराणिचित्रमनुनाखड्गो विधीयते।। प्रथमः।। सखेसाधु स
मर्थितं।। अन्यथाकथनस्तेमहाराजाय स्वप्ने कुलगुरुः सादरं स्वयंप्रभदेवस्तादृशीं श्रेयस्संग्रहकारिकामुप
दिष्टवान्।। स्वयंप्रभदेवप्रसादरूपस्यबीजस्य बहुकारणात् परिकरः।। द्वितीयः।। सविमर्शोऽन्वयं। कथमवगते
राजरहस्ये। वयस्येन प्रथमः।। सखेकुस्यवान्विदितमिदं।। यस्तु वस्मिन्नेपि निजनगरे महोत्सवमादिशतारु
द्रनरेश्वरेण कुलदेवतायास्वप्नोपदिष्टाप्रसादविशेषः प्रख्यापयलएव।। कुलदेवताप्रसादरूपबीजस्य
प्रख्यापनेनन्निष्पत्तेः परिन्यासः।। द्वितीयः।। अहो निरंतरप्रसादोन्मुखतादेवस्य।। यथाकाकतीयप्रसंवे
धुश्रियानस्युत्तरोत्तरमनुबध्यते।। बीजस्यभूयोनुबंधनगुणाख्यादिलोभनं।। तदस्मिन्नेवमहोत्य
सिमहेमरवेमंडलाखंडलंचलमराएऽमुपालोकयितुमयमेवावसरः।। तदेहिराजकुलं प्रविशावः प्रथ
मः।। वयस्यसौ प्रतंपुरोधः प्रमुखानमात्यवरान् अपि पुरस्कृत्य कल्याणस्वेन क्रमं मीमांसमानो नर
पतिरभ्यंतरास्थानीमधितिष्ठति।। तदावामपि तावदोत्तुंगसभ्यथावसरं प्रयतिष्याव इति परिक्रम्य
निष्क्रांतौ।। प्रथमः।। विष्कंभः।। ततः प्रविशति यथानिर्दिष्टो राजा चामरग्राहिणी च।। राजा।। सहर्षोल्लासित
यं।। अहो प्रसादातिशयः परमेश्वरस्य।। सोमान्वयनिजनं तत्तद्धजन्यपतिश्रीकाकतीयान्वयपातिप्रमु
पेतिसांप्रतममीष्वमासुं विश्वंभरा।। अस्माभिर्निजदोः प्रसरतिमधुनाधन्यामजातमन्यते यत्कृत्येयम्
पादिशतकुलपतिर्देवः स्वयंभूः स्वयं।। पुरोधसः।। महाराजबाहुरुद्रएव परमहेतितादृगमहिम्नादेवस्यहि

तोपदेशात्। अथवा किमत्राभिनवं॥ पुत्राणां हितोपदेशोऽधिकारः पितुरेव॥ यदोऽयं कथयति तद्धृदः सैवोमास्वे
तिनिर्दिष्टा सोमास्वेति पृथा मगात्॥ तव माता शिवः साक्षाद्देवो गणपतिः पिता। एवमेवैतत्॥ कथमन्यथा दे
व्यप्रसादादृते निसंकुमारं स्त्रीव्यक्तिविशेषस्य लोकाधिपस्य॥ एवममानुषं शंभुना गणपतिमगराजेन्यतर
स्यानुभवमहिम्नस्संदृशामत्र पुष्प इति व्यवहारः कृतः॥ तदनुगुणा चरुद्र इति समाख्या। पुरोधसस्स
कौतुकं। कीदृशी देवस्य स्वप्नपरिपाटी। राजा सादरं। इदं निवेद्यते। कदाचित्कल्याणे रजनीसमये स्मेरवदनं
पुरः प्रादुर्भूतं सस्पृवति वपुः साग्निजटिलं। स्रवंतिचंद्राभ्यां महितमकुटं वीक्ष्य किमपि स्वयं मदेवोऽसावहमि
ति हर्षोत्थाने ममज। अनंतरं स्वप्नएव॥ वपुषाहं नमस्कृत्य स्तुवन् सन्नतयाभिरा॥ स्वामिन्नेवाकृतीनां
रत्नासनमुपादरं। नामरत्नाहितिति। अहो देवस्य जगणस्य प्राणं। जं सिंधि एए विकूलसामिणो समारोह सं। पु
रोधसः। किमुच्यते प्राविष्ट सत्यं॥ खलु स्वयं मदेवकाकुत्स्थीयनरदेवाः॥ ततस्ततः॥ राजा। पार्श्वादिरस्था
नकृतस्य पूर्णकुंभस्य तत्ये। परिकल्प्य पार्श्वं। इतो हुसारे मणिभिः किलाप्समप्रजयं देवतमसमंदीय॥ अ
पत्व॥ किन्तु स्वयंभूर वदः मुचिह्नि तांगिरं स्ववामार्द्धे वधूपलालितां॥ स्पृशन्न करेणाभयदानकालिना
कृतां जलिं मां विनयानततानां॥ य किल। उमास्तके मे धममलोकस्तावेस्तयोविनोदेरनंचेः पृथिव्याः स
म्यकफलैः सत्वरितैः प्रजानां प्रतापरुद्रोऽस्य मिताव तीर्णः॥ वत्सकाकुत्स्थीय कुलप्रदीपस्त्वीकृतपुत्रभावे
न दौहित्रे प्राज्ञमात्रया॥ अस्मिन्निचेहि धौरेयगुवर्धुक धुरामिमां॥ पुरोधसमोदं॥ महाराज काके
तीयकुलयोगक्षेमदक्षेण दाक्षायणीपतिनाक्षाद्देव मादिष्टं॥ तवाप्ययमेवमनोरथः॥ प्रियंकरस्त्वा
यं महोत्सवः सर्वप्रकृतीनां॥ तदारोहतु प्रागतिस्वस्त्यो यौवराज्य प्रतापरुद्रस्य भुजस्तम्भोऽपरस्सावरमेवस्तु॥ इयं १८

प्रयोजने निर्धारणरूपा युक्तिः ॥ ततः राजा तद्वचनमाकर्णयति ॥ निर्भरहर्षविकस्वरलोचनो मेदिन्यपि देवस्य पा
र्श्वदृष्टा ॥ चा ॥ महाराज त्वंसहि श्री श्री अण वंटेभाणा एव वसुंधरा एउद्दोरस्य श्रीदुरितवि नावो ॥ एष स्वयंभूदे
ववचनकर्णनेन मेदिन्याः सुखावाप्तिः राजा ॥ काकतीयकुलश्रियास्त्वां देव एव प्रमाणमिति ॥ तस्या
त्वामयादिररसिध्यता ॥ देवोऽपि सप्रसादं तिष्ठति माम लोक्यां तर्हि हेतो भूत ॥ इदं मेदिनी प्राप्ति हेतो भूत ॥ इदं
मेदिनीप्राप्तिहेतो बीजस्य स्वयंभूदेवस्योपदेशांगीकरणात् समाधानं मंत्रिणः विश्वप्रियंकरस्य च प्रत्ययः ॥
काकतीयनरेश्वरवद्दोचितमाम्बरपाम नुवर्तमानस्य नगरनिवासमेव मुख्यं ॥ तथा कुलधुरंधरस्य वीर
रुद्रस्य विश्वरक्षा समेवापरिखेराजाधुरा विश्रांतिरिति च विषादहर्षयोः सीमानं स्पृशा स्वस्नाकं ॥ मुखदुः
खमाश्रयः ॥ चामर ग्राहिणी ॥ जम्बु द्दकुलाम च मुहे णं वयं वधीवं लक्षेणएवं ऊवदिदं ॥ आम्रपरूपपरित्ताष
बद्धनो राजा ॥ अमा सान्प्रति ॥ जयं काकतीयकुलश्रियः कल्पलताप्ररोहः स्वयंभूदेवानुग्रहे सर्वेषाम
पिश्रवणमहोत्सवः क्रियतां ॥ एव बीजप्रकाशनामुद्भेदः ॥ मंत्री यदाज्ञापयति काकतीयपरमेश्वरः ॥ रा
जा ॥ किमिदानीं कर्तव्यं ॥ पुरो ॥ महाराज किमन्यत् तस ज्ञीक्रियतां ॥ प्रतापरुद्रस्य राज्याभिषेकसंभारः ॥
एष बीजानुगुणप्रोत्साहनरूपोद्भेदः ॥ मंत्री ॥ दिग्विजयपात्रावशीकृताराज्ञां वर्गोपानीतैस्सकलती
र्थसलिलैः प्रकाशितस्वयंभूदेवप्रसादं महाभिषेकभवतु ॥ राजपुत्रः ॥ पुरो ॥ उचितमनुमंत्रितं मंत्रिभिः
राजा ॥ तर्हि जैत्रयात्रासाधनानि सज्जीक्रियतां ॥ षड्विधाबलानि ॥ अहमपि सज्जो भवानि ॥ एषआ
रंभः ॥ इदं बीजानुगुणारंभरूपकरणं ॥ एवमारंभबीजसंबंधरूपस्संगोमुखसंधः ॥ नेपथ्ये वैता

लिका॥ सुखायमाध्यंदिनिसंव्रानवनुदेवस्य॥ यदिदानीं॥ लोकालोकगिरिंद्रकंदरसमसंदोहदर्पापहं सत्तेजः
पटलं क्रियं तिसु वनान्याक्रम्यसंक्रीडति॥ इसालोकूनकौतुकीवशिथिलः स्वीयाविकारभ्रमो भास्वानेष
समग्रदीप्तिरधुना व्योमाप्रमास्ते हृति॥ अपिच॥ उद्गायंतिमारं निशाकरकर स्तोमहिषस्स दुपान्
क्रीडं सोम प्रयादि चंदनलता कुंजे भुजंगांगनाः॥ पीवातत्त दुदीर्ण वर्णगसितांप्रसूप्रधारं सुधां
वाताहारतया प्रभक्ष्त तमंयशः प्रक्षालयं सोनिजं॥ इदानीं खलु॥ आचार्यकीरणानूभोनोर्यद्ज्चरामो
दमेदुरान्॥ यतजेहृतिनः सर्वैकर्त्तुमाध्यान्हिकीं क्रिया॥ राजा॥ प्राकर्ण्य सर्वोन्नपति॥ साधयत्नुपय्यं
ममह्निताचरणाय॥ जहमपिता

अथ गुणनिरूपणानंतरं अलंकारा निरूप्यंते॥ अलंक्रियते नेनेति चारुत्वहेतुरलंकारः॥ तथा च ते लंकाव्यप्रकारो उपकुर्वंति
तं संतं योगद्वारेण संभिन्नाः॥ हारादिवदलंकारास्तेनुप्रासोपमादयः इति। यथा करचरणाद्यवयवगतैर्वलयनूपुरादि
भिस्तदलंकारतया प्रसिद्धैरवयव्येवालंक्रियते। तथा शब्दावयवगतानुप्रासोपमादिभिस्तदलंकारतया प्रसि
द्धैस्तदवयवि तत्काव्यमुपस्क्रियते॥ आश्रयाश्रयिभावेनालंकार्यालंकारभावो लोकवत्काव्येपि संमतः॥ चारुत्वहेतुत्वेपि
गुणानामलंकरणानां चाश्रयभेदाद्भेदव्यपदेशः॥ घटनाश्रया गुणा नाश्रया गुणाः शब्दार्थाश्रयास्त्वलंकाराः॥ तत्र श
ब्दार्थगतत्वेन त्रैविध्यमलंकारवर्गस्य॥ अर्थालंकाराणां चातुर्विध्यं। केचित्प्रतीयमानवस्तवः॥ केचित्प्रतीय
मानौपम्याः॥ केचित्प्रतीयमानरसभावादयः। केचिदस्फुटाः। केचित् प्रतीयमाना इति। समासोक्तिपर्यायोक्त्याक्षेप
व्याजस्तुत्युपमेयोपमानान्वयातिशयोक्तिपरिकराप्रस्तुतप्रशंसानुक्तनिमित्तविशेषोक्तिषु प्रतीयमानं वस्तुकाव्यो
पस्कारतामुपयाति। रूपकपरिणामससंदेहभ्रांतिमदुल्लेखापह्नवोत्प्रेक्षास्मरणतुल्ययोगितादीपकप्रतिवस्तूप
मादृष्टांतासहोक्तिव्यतिरेकनिदर्शनासु वे औपम्यं गम्यते। रसवत्प्रेयऊर्जस्विसमाहितं भावोदयभावसंधि
भावशबलतासु रसभावादिकमुच्यते॥ उपमाविलोक्यर्थांतरन्यासविरोधविभावनोक्तनिमित्तविशेषोक्तिविषम
समविचित्राधिकान्योन्यकारणमालैकावलीव्याघातमालादीपककाव्यलिंगानुमानसारयथासंख्यार्थापत्तिप
र्यायपरिवृत्तिपरिसंख्याविकल्पसमुच्चयसमाधिप्रत्यनीकप्रतीपविशेषमीलनसामान्यासंगतितद्गुणातद्गुण
व्याजोक्तिवक्रोक्तिस्वभावोक्तिभाविकोदात्तेषु सदयहृद्याहादिस्फुटं प्रतीयमानं नास्ति। रूपकसंदेहप रिणामभ्रां
तिमदुल्लेखापह्नवानां भेदप्रधानसाधर्म्यनिबंधनत्वं। दीपकतुल्ययोगितानिदर्शनादृष्टांतप्रतिवस्तूपमासमासो
क्तिप्रतीपव्यतिरेकास्तेदप्रधानसाधर्म्यनिबंधनाः॥ उपमानान्वयोपमेयोपमास्मरणानां भेदाभेदसाधारणता

धर्म्यमूलता उत्प्रेक्षातिशयोक्ती अध्यवसायमूले विभावनाविशेषोक्ती विचित्रासंगत्यन्योन्यव्या॰घातातद्गुण
भाविक विशेषाणां विरोधमूलता।। यथासंख्यपरिसंख्यार्थापत्तिविकल्पसमुच्चयानां वाक्यन्यायमूलता।। परिवृत्ति
प्रत्यनीकतद्गुणसमाधिसमस्वभावोक्त्युदात्तविनोक्त्योः लोकव्यवहारमूलाः।। काव्यलिंगानुमानार्थान्तरन्यासास्त
र्कन्यायमूलाः।। कारणमालैकावलीमालादीपकसाराः शृंखलान्यायमूलाः।। व्याजोक्तिवक्रोक्तिमीलनानि निह्नव
मूलानि।। समासोक्तिपरिकरौ विशेषणवैचित्र्यमूलौ।। अत्रालंकाराणां परस्परवैलक्षण्यं निरूप्यते।। आरोपग
र्भत्वेपि आरोप्यमानस्य प्रकृतोपयोगाभ्यां परिणामरूपकयोर्वैलक्षण्यं।। आरोपविषयस्यारोप्यमाणरूपसंसर्गवा
संभवाभ्यामुल्लेखरूपकयोर्भेदः।। आरोपविषयस्य संदेहभ्रांत्यपह्नवैः संदेहभ्रांतिमदपह्नुतीनां परस्परं भेदः।।
साधर्म्यमूलत्वेपि तुल्ययोगितादीपकनिदर्शनव्यतिरेकदृष्टांतेभ्यः साधर्म्यस्य वाच्यत्वादुपमानानन्वयोपमा
भिद्यते।। साधारणधर्मस्य वाच्यत्वगम्यत्वाभ्यामुपमेयोपमात्रितिवस्तूपमयोर्भेदः।। वस्तुप्रतिवस्तुबिंबप्रतिबिंब
भावाभ्यां प्रतिवस्तूपमादृष्टान्तयोर्भेदः।। प्रस्तुताप्रस्तुतानां व्यस्तसमस्ताभ्यां तुल्ययोगितादीपकयोर्भेदः।। उपमा
नस्य प्रसिद्धत्वप्रसिद्धत्वाभ्यामुपमाश्लेषयोर्भेदः।। अर्थसाम्यशब्दसाम्याभ्यामुपमाश्लेषयोर्भेदः।। उपमानोपमे
ताव यस्य पर्यायप्रयोगपद्याभ्यामुपमेयोपमानन्वययोर्भेदः।। अप्रस्तुतस्य वाच्यत्वगम्यत्वाभ्यां प्रस्तुतप्रशंसासमासो
क्त्योर्भेदः।। वाच्यव्यंग्ययोरुभयोः प्रस्तुतत्वे पर्यायोक्तिः।। वाच्यस्याप्रस्तुतत्वे प्रस्तुतप्रशंसा।। वाच्यपक्षधर्मता
द्यभावात् काव्यलिंगस्यानुमानाद्भेदः।। साधारणगुणयोगात् भेदानुपलब्धौ सामान्यमुत्कृष्टगुणयोगात्स्व
नगुणतिरोधाने मीलनं।। अन्यव्यवच्छेदनात्पर्यवसानात्तद्गुणालंकारस्य परिसंख्यातो भेदः।। काकतालीयत्वाकार्य
साधने कारणांतरोपनिपाते समाधिः।। अहमहमिकया कार्यसाधने बहूनां कारणानां समुच्चये द्वितीयसमुच्चयः। १

निन्हवस्यवा अवगम्यताभ्यामपन्हुतिव्याजस्तुत्योर्भेदः॥ अन्येषां भेदस्पष्टएव॥ यद्यपिव्याजोक्तिमीलनसाम्येषुकुत्रं
चित्सादृश्यमस्ति तथापिउक्तिविवक्षितत्वान्नसादृश्यमूलेषुगणना॥ अथालंकारस्वरूपविभागानंतरं शब्दार्थयोर्म
ध्ये शब्दस्यप्रतीत्यनंतरंगत्वात् प्रथमं शब्दालंकारान्निरूपयंते॥ अव्यवधानेन द्वयोर्व्यंजनयुग्मयोः॥ आवृत्ति
र्यत्रसंबुध्यैः छेकानुप्रासइष्यते॥ यत्राव्यवहितयोर्व्यंजनयुग्मयोः पौनरुक्त्यं तत्र छेकानुप्रयासः॥ यथा॥ भन
हामहीविभवेबले क्षेमंकरेकरे॥ राजन्यजन्यविजयीराजाराजद्गुणोदयः॥ एकद्विप्रभृतीनां तु व्यंजनानां
यदाभवेत्॥ पुनरुक्तिसौनाम वृत्त्यनुप्रासइष्यते॥ यथा॥ रेरे क्षुद्रमहीक्षितः क्षणमितः श्रीकाकतिक्ष्मापते॥ वि
क्षुब्धं ध्वजनीं दुरीक्ष्यसुभटाः प्रोत्क्षिप्तकौक्षेयकैः॥ योस्येध्वेयदि लक्ष्यमक्षयमदं क्रांत्वा नपक्षो व्यथाक्ष्माभृत्
स्वक्तत्वरक्षुनिकरात्त्रात्रामरक्षाकुलः॥ यमकं पौनरुक्त्ये न स्वच न व्यंजनयुग्मयोः॥ छेकानुप्रासे वृत्त्यनुप्रासे
चस्वरपौनरुक्त्यमानुषंगिकं॥ यमके तु सस्वरयोर्व्यंजनसमुदाययोरावृत्तिः॥ तस्यादिसंध्यागतत्वेनबहवो
भेदाः॥ अत्रादिमात्रमुदाह्रियते॥ प्रतापकाकतींद्रस्य महामहिमतेजसः॥ यत्राद्यो समुखेकिंचिद्भासते
पुनरुक्तवत्॥ पुनरुक्तवदाभासोलंकारः सस्ततंमतः॥ यत्रार्थः पुनरुक्तवदाभासते। अन्वयवेलायामन्यथा
भवति सपुनरुक्तवदाभासोलंकारः॥ अर्थालंकारत्वेप्यस्य शब्दपौनरुक्त्याश्रितत्वाच्छब्दालंकारप्रस्तावे लक्ष
णं कृतं॥ यथा॥ त्रिसृष्टिं दृप्तितिप्रजां श्रीपतिः पुरुषोत्तमः॥ भास्वान्सर्वः स्फुरत्तेजाः काकतीन्द्रो विराजते॥
अर्थोभयपौनरुक्त्यालंकारः कथ्यते॥ शब्दार्थयोः पौनरुक्त्यं यत्र तात्पर्यहेतुवत्॥ स काव्यतात्पर्यविदां ला
टानुप्रास इष्यते॥ यत्र शब्दार्थयोरुक्तावपि तात्पर्यभेदमात्रेण स्वरूपभेदः॥ स लाटानुप्रयासः॥ यथा॥ गुणागुंस्ते ण

गण्यंते येरुद्द्रूपमाश्रिताः॥ नीतिं नीतिरसौ तस्य लक्ष्मी लक्ष्मीश्च गीयते। पद्माद्याकार हेतुत्वे वर्णानां चित्रमि
ष्यते। आदिग्रहणाच्चक्रबंधादयः॥ तत्राष्टदलपद्मबंधोयथा। धातायस्यासमग्रां नतिमितकुनकुस्यान
सत्तासन्नाचायानासत्तासनस्थासुरक्षत्कुमलाभ्यासस्तुज्ञानमाप्या। यामानत्नासुसत्याक्षितिपतितिलकं
जातिरत्नासमेयाजेयासत्कारतिजासुहृनिबुफलितग्रामसस्यायतान्या। चक्रबंधोयथा। लक्ष्मीशीलितवे
सवस्य जगतां नाथस्य भद्राश्रियोदिक्चारध्वनिजप्रतापजनितं भाकुब्युरायछत्तः। निस्संरद्ध नराधिप
स्य जयिनो भाति प्रकाशस्त्रिरा राजन्पालनमोदिताभनिभुजेयोभ्याश्रितसाधरा। अत्र चक्रे विद्यानाथ
कृतिवीररुद्रस्य यश इति प्रतीयते। नामबंधोयथा। जोजस्येरुद्रदेवे विभवतिमहिमस्साजितान्यप्रतापे
विद्यास्पर्धि तेलप्युरुहरिलंविम्बविस्तारभाजी। वैरी वाला भजंते वनमतिमलितरव्यातयोदेहविध्यावनो
रध्यन्यपार्श्विक्षितिनतिविविधेजंतुभिस्थानभाजः॥ ॥इति शब्दालंकारप्रकरणं॥ ॥अथार्थालंकारः॥ सा
म्यमन्येन वर्ण्यस्य वाच्यं चेदेकदोपमा। यत्र स्वतः सिद्धेनस्वतोभिन्नेन सहृदयसमंतेनाप्रकृतेन सह प्रकृ
तस्य धर्मतः साहृरूप्यमेकदा वाच्यं चेद्भवति तत्रोपमा। स्वतस्सिद्धेनेत्यनेनोत्प्रेक्षाया व्यावृत्तिः। उत्प्रेक्षा
या मप्रसिद्धस्योपमानत्वसंभवात्। स्वतो भिन्नेनेत्यनेनानन्वयव्यावृत्तिः। अनन्वये एकस्यैवोपमानोपमे
यत्वात्। संमतेनेत्यनेनापूर्णोपमादिव्यावृत्तिः॥ धर्मतइत्यनेन श्लेषव्यावृत्तिः श्लेषे शब्दसाम्यमात्रम
भ्युपगतं न गुणक्रियासाम्यं। अन्येनसाम्यमित्यनेन प्रतीपव्यावृत्तिः। प्रतीपे ह्युपमेयस्यैवोपमानत्वक
ल्पनात् प्रकृतेनसह प्रकृतस्यसादृश्यं वर्ण्यते एकदा साम्यमित्यनेनोपमेयोपमाव्यावृत्तिः। तत्रोपमा

नोपमेययोरनेकदासाम्यप्रतिपादनं। वाच्यमित्यनेन गम्यौपम्यस्य रूपकादेर्व्यावृत्तिः॥ एतत्सर्वेभ्यः साधर्म्यमूलेभ्यो
विलक्षणेयमुपमा॥ साप्युपमा द्विविधा पूर्णा लुप्ता चेति। उपमानोपमेयसाधारणधर्मसादृश्यप्रतिपादकानां प्रयोगे
पूर्णा॥ एकस्य द्वयोस्त्रयाणां वा द्विलोपे द्विलुप्ता। पूर्णा द्विविधा श्रौती आर्थी चेति॥ साक्षात्सादृश्यप्रतिपादकानां यथेवा
दीनां प्रयोगे पूर्णा श्रौती। धर्मिव्यवधानेन सादृश्यप्रतिपादकानां सादृश्यसंकाशनिकाशादिशब्दानां प्रयोगे आर्थी। ते
अपि द्वे समासे तद्धिते वाक्यगतत्वेन त्रिविधे। एवं पूर्णोपमा षट्प्रकारा॥ लुप्तोपमा एकोनविंशतिभेदा। तेन तुल्यं क्रिया
चेद्वतिरिति सदृशार्थे विहितस्य वतेरुपादाने आर्थी। तत्र तस्येव विहितस्य इवार्थे वतेरुपादाने श्रौती। अतएव
सादृश्यार्थे विहितस्य वतेः प्रयोगे धर्मोपादानेनान्वयसौकर्यादनुक्तधर्मा तद्धितगा श्रौती लुप्ता नास्ति कल्पबादि
प्रयोगे वाच्यो वा। अथोदाहरणानि॥ पूर्णा श्रौती यथा। उद्दामोद्यतविक्रमेद्धतरपुंगवाहो यया तेये यथा त्रेतायां रघु
नायकस्य महितख्याता सुजाता यथा। दोर्दण्डः युधिष्ठिरस्य विलसच्छौर्ये यथा द्वापरे विस्तब्ध्वा ध्वजकेतोस्त
येव रमते सोऽण्वं द्दभन्ते भुजे॥ अथ समासगा पूर्णा श्रौती यथा। भास्वानिवोद्यन्नुदयाद्रिलब्धो भद्रासनस्थो
वरः वीररुद्रः। उत्सवश्च स तामन्त्र पुरीजनानां नेत्राब्जजाड्यं शमयत्यशेषं॥ अत्र भास्वानिवेति इवेन सह नि
त्यसमासः। तद्धितगा पूर्णा श्रौती यथा। कूर्मवत्क्लेषवत्कोविदत्वगिरिवत्तिग्म देहवत्॥ भुजे प्रतापरुद्रस्य धुरि
णो भाति मेदिनी॥ वाक्यगा पूर्णा आर्थी यथा। तैस्तैर्महीपालनसंविधानैस्तैस्तैः प्रजारक्षणवैभवैश्च॥ स्व
तेजसा संप्रतिकाकुत्स्थीय लक्ष्मीपति दशरथैः समासः॥ समासगा पूर्णा आर्थी यथा। तादृक् कृपालनसामर्थ्यसंप
दाकाकुतीश्वरः॥ हरिः। दीश्वरसंकाशः शास्ति मध्यमविष्टपं। तद्धितगा पूर्णा आर्थी यथा॥ हेमाचलवदौन्नत्ये
गांभिर्ये क्षीरसिंधुवत्॥ प्रतापभानुवद्भाति वीररुद्रनरेश्वरः॥ अनुक्तधर्मा वाक्यगा श्रौती लुप्ता यथा॥

यथा रुचा स्वादिनि चक्रवाक्यो यथा च नोहारुरुचो चकोर्यः ॥ यथा प्रसन्नस्तव केन्त्र मर्त्यस्तथा प्रजाः काकति वीररुद्र ॥ अनुक्तधर्मा
समासगा श्रौती लुप्ता यथा ॥ प्रतापरुद्रदेवस्य पादपीठे मनारतं ॥ आराधयंति भूपालाः प्राणता देवतामिव ॥ अनुक्तधर्मा वा
क्यगा आर्थी लुप्ता यथा ॥ काकतिक्ष्मापते यैत्र प्रस्थानपटहध्वनि ॥ तुल्यं दमौलिनिर्घोषैस्त्रैयं चन्त्यहिमरीमतः ॥ अनुक्तधर्मा ध
समासगा आर्थी लुप्ता यथा ॥ इभ्रखुरैभेकपिलाभिधानां यश्चोक्तसारस्य सदृशम्भवेक्ष्य ॥ नमंति भूपा भुवि काकतीयरुद्र प्रतिष्ठं
वपुर्मन्यमानाः ॥ अनुक्तधर्मा तद्धितगा आर्थी लुप्ता यथा ॥ प्रतापरुद्रनृपते जगन्महिततेजसः ॥ कंदर्पकस्यनाकारस्य
त्यंध्रपुरंधयः ॥ अनुक्तधर्मवादिकर्मक्यचा लुप्ता यथा ॥ दुग्धार्णवीयेसंभोधीन्केलासीयति क्ष्माधरान् ॥ प्रताप
रुद्रदेवस्य यशो वै सद्यवैभवं ॥ अनुक्तधर्मवादिराधारक्यचा लुप्ता यथा ॥ क्रीडाद्रीयति गोत्रशैलनिकरे स्वस्ता
नसंमीयति गोत्रशैलनिकरे स्वान्नानसम्मीयति द्वीपेषु क्षितिषु दीर्घिकीयति हरित्स्वेकान्तगेहीयति ॥ उद्याली
यति सीम पर्वततदारण्येषु पर्वाचले प्रासादीयति वीररुद्रनृपतेः स्फारः प्रतापोदयः ॥ अनुक्तधर्मवादिः क
र्मणा मुला यथा ॥ पद्मस्यामलजदर्शमिंदुममरस्त्रोतस्विनी सत्सखी दर्शं सीध्र ॥ रपयोनिधिं प्रियसुहृदं दर्शनि
रिंराजतं ॥ लोलाद्यैनद्रशमन्यदमलंतारादिहारावली दर्शं खेलति वीररुद्रनृपते कीर्तिर्जगद्व्यापिनी ॥
अनुक्तधर्मवादिः क्विपा यथा ॥ सुधाप्रपाति हि सतामस्ता कालकूटति ॥ वीररुद्रनरेंद्रस्य गुणज्योत्स्नाविज्
भिता ॥ अनुक्तधर्मोपमेयवादिः क्यचा यथा ॥ ज्योत्स्नीयति सुधीयति चंद्रनीयति सर्वतः ॥ प्रतापरुद्रनृपतेः
पूर्णा कीर्त्तिमहोर्मयः ॥ अत्र कीर्त्तीनां स्वरूपमुपमेयं ॥ अनुक्तधर्मवादिः क्यङा यथा ॥ द्रोणायते महीवोढुं कल्प
शाखायतेर्थिनां ॥ प्रतापरुद्रदोर्दंडः कालदंडायते द्विषां ॥ अनुक्तोपमानवाक्यमा लुप्ता यथा ॥ वेदान्यो न्योनास्ति
स्यादि ॥ अनुक्तोपमाना समासगा लुप्ता यथा ॥ वीररुद्रसमो राजा नास्ति नान्यो वसुस्थले ॥ यस्य धर्मानुबन्धेन

कलिः छलमृगी छलः॥ अनुक्तधर्मोपमानावाक्यगा लुप्ता यथा॥ लोके काकतिवीररुद्रनृपते त्वन्नामन्त्रमस्त्रियः
कीर्त्यो लोकिककौमुदीयधवला तुल्यं किंचित्क्वचित्॥ यन्माधुर्यविजृंभितफलविषा ग्रीवा विलोक्याधुना कर्णालिं
गनसिंगितुर्वि तनुते नीरप्रमदः सुता॥ अनुक्तधर्मोपमानासमासगा लुप्ता यथा॥ प्रतापश्रीतुल्यं क्वचिदपि न तत्
तेन च सवन्नभाति त्रैलोक्ये किमपि जयिनः काकतिविभोः॥ प्रकाशोऽप्युत्सत्तिर्भवनत्तरितैर्यद्विलसितैरसूर्यंप
र्यानामवधिभिरपाम्भास दृषदां॥ अनुक्तधर्मोपमानेवादिः समासगा यथा॥ काकतीं धीरणे भाति भीमसे
नपराक्रमः॥ किंच दुःशासनाः सर्वे यस्य प्रत्यर्थिपार्थिवाः॥ एवं भेदांतरं यथासम्भवमुदाहार्यं॥ एकस्यै
वोपमानोपमेयत्वेनान्वयो मतः यत्र द्वितीयसब्रह्मचारिनिरसर्थमेकस्यैवोपमानोपमेयभावो निबध्य
ते॥ सावनन्वयालंकारः॥ सन्तु लोके सुवर्णादिरत्नाकरसुधाकराः॥ तथा वीरस्त्वं डोयं वीररुद्र इव स्वयं॥
पर्यायेण द्वयोस्तस्मिन्नुपमेयोपमानता॥ तस्मिन्निसुपमानोपमेयत्वप्रत्यवमर्शः॥ धर्मोर्थ इव पूर्णश्रीरर्थो
धर्म इव स्थितः॥ कामस्त्वामिव तौ काम इव वरुद्र नरेश्वरे॥ सदृशानुभवादन्यस्मृतिः स्मरणमुच्यते॥ यत्र सदृश
पदार्थादनुभवेन सदृशावस्त्वन्तरपरामर्शो जायते तत्र स्मरणालंकारः॥ यथा॥ राज्ञा प्रतापरुद्रेण पालि
तेयं वसुंधरा॥ हरिश्चन्द्रनलादीनां प्राच्यानां स्मारयति भभुजां॥ अत्र नलनलुषादिप्रवीणतया प्रतापरुद्र
रसितारं प्राप्य वसा मेदिन्या पूर्वराजस्मरणं॥ स्वेदापत्तिदसाधारणधर्म निवन्धनालंकारादर्पिताः॥
सप्रत्यारोपगर्भालंकारप्रस्तावस्तत्रापि प्राधान्यात्सुप्रथमं रूपकं निरूप्यते॥ आरोपविषयस्य स्याद्
तिरोहितस्य रूपिणः॥ उपरंजकतारोप्यमाणं तद्रूपकं मतं॥ अत्रारोपविषय इत्यनेनाध्यवसायगर्भ

स्योत्प्रेक्षादेरनारोपमूलानामुपमानादीनां व्यावृत्तिः। ऽतिरोहितरूपेणेत्यनेन संदेहभ्रान्तिमदपह्नुतीनां
व्यावृत्तिः। संदेहालंकारे विषयस्य संदिह्यमानतया तिरोधाने। भ्रान्तिमदलंकारे भ्रान्त्या विषयतिरोधाने। अप
ह्नुत्यलंकारेऽपह्नवेनापि विषयतिरोधानं। उपरंजकमित्यनेन परिणामालंकारव्यावृत्तिः। परिणामे ह्यारो
प्यमाणस्य प्रकृतोपयोगित्वेनान्वयो न प्रकृतोपरंजकत्वेन। तत्सर्वेभ्यः सादृश्यमूलेभ्यो विलक्षणं रूपकं
तत्र प्रथमं त्रैविध्यं। सावयवनिरवयवपरंपरितं चेति। सावयवं द्विविधं समस्तवस्तुविषयमेकदेशविव
र्ति चेति। निरवयवं द्विविधं। केवलं मालारूपं चेति। परंपरितस्यापि श्लिष्टताश्लिष्टतानिबंधनत्वेन द्वैवि
ध्ये तयोरपि प्रत्येकं केवलमालारूपतया चातुर्विध्यं। एवमष्टविधो रूपकालंकारः। उदाहरणानि।
यत्रावयवानामवयविनश्च सामस्त्येन निरूपणं निबध्यते तत्समस्तवस्तुविषयकं रूपकं। यथा। प्या
त्राप्रावृषवीररूढनृपतेर्निस्त्राणधाराधरे वैरिक्ष्मापतिगर्वपर्वतभिदापीमं मुहुर्गर्जति। अत्र स्त्रीनयना
म्बुवृष्टिरसरूढालतायथास्य वर्षो वर्षन्ते हरिदन्तरेषु जगदानंदाय यशःकंदलाः। यत्रावयवनिरूपणा
दवयविनो निरूपणं गम्यते। तदेकदेशविवर्तिरूपकं। यथा। प्रसाधिताशाविवरान्तराळैः स्रोत्यांकुरैः
काकुतिवीररुद्रः। विकस्वरैर्वासनया त्रिलोकीं गुणप्रसूनैः सुरभीकरोति। अत्रावयवानां गुणानां प्रसूनैर्नि
रूपणेनानुरूपतः कल्पशाखित्वं निरूप्यते तस्मादेकदेशविवर्ति। यत्रावयवनिरूपणमात्रेकसंरंभवि
रहस्तन्निरवयवरूपकं। अवयवनिरूपणाभावेऽपि तथैव। तत्र केवलं यथा। यात्रार्त्तसविकल्पसमाणसु
नटप्रस्वेदसान्द्रिरितेनिस्स्वानध्वनिभिः स्फुटं प्रतिदलद्दोदःकटाहान्तरे। नोपयोगेष्यवाव्याप्तवान्नपरिणामो
त्वर्णो वः। विषयो विषयी यत्र सादृश्यात्कविसंमतात्। संदेहगोचरोस्याता तां सचेतालंकृतिस्तथा। भ्रुदानिश्च

स्वेतालंकृतिस्तथा॥ मुद्रानिरू १

यगर्भो निरूप्यतां तावेति॥ संदेहमात्रपर्यवसायिनी मुद्रा यथा॥ किमेष नवमो हरिः तपनिरमंद संपसुदं किमेव दस्मा
नः प्रजापतिरपूर्वसर्गक्रमः॥ किमेव हरिरुर्वरेतद्दरणं चंचुरे कादद्रोग्निरदितिं विलोक्यते जगतीवीररुद्रो जनैः
निश्चयगर्भो यथा॥ कालाहिः किमयं न णाल मृदुलस्तोगस्य घत्ते पुनः॥ कालभ्रभ्रुकुटिरेष किंतु मुखव एवोज
ंभते सापुनः कालोग्रानलभीमपद्धतिरसौ किंसापुनर्भ्रूयलेवात्तेनेभि विकल्पिते प्रतिभटे रुद्रस्य कोपेयक्
निश्चयपर्यवसानो यथा॥ किं कल्पद्रुममंजरीस्रजड मे किं वाय कोरावयेस्व धेनोरप्य वाकिमुज्वलनरा किंत
मणे स्फूर्त्तयः॥ किं वासिंदुमयं परं मितिव्यामिश्रनिश्चिन्वते संततः भ कतिवीररुद्रनृपतेः स्मेरा कृदास्तादृति।
यं विस्मतसादृश्यादिविषये विहितालनि॥ आरोप्यमानानुभवो यत्र संभाति सम्मतः॥ यथा॥ काकतीयवि
भोः कीर्त्तिर्विनवे व्याप्तरोदसी॥ दिवा च चंद्रिका बुध्या चकोरास्यांति चत्तये॥ निषिद्धविषये साम्यादन्यारोपे ह्यप
न्हुतिः। तस्याश्चैविध्यं॥ अपन्हुत्यारोपः॥ आरोपापन्हुतिः छद्मादिना व्देरसत्यत्वप्रतिपादनं च॥ आद्यद्वय
स्योदाहरणं॥ उद्वेलम्मनुरणंबी कुलं कलोनायं च मृदंबरो नेदं दुंदुभिगर्जितं त्रिपुरजित् कुर्यान्तटंकारवः॥ इ
त्यं रुद्रनरेंद्रवादिषु महोभारावनम्रीभवद्धोषाग्रो षेफणासु विस्मितमथ त्रस्ते दिग्गोद्रोरपि। छलादिना
व्देरसत्यत्वप्रतिपादनं यथा॥ सर्वा काकतिवीररुद्र धरणीनाथ छले न क्षितिं पालं मन्यमन्यन लोकपाल
पदवीं प्राप्तः स्वयं मं पीलु॥ नैव च वेद्विषमाव लोक नव लामान्त्रेण भस्मीकृते जातं वैरिपुरे कृयं कृयम
वाद्भूतं च भंभ्रहणे॥ अथ योगरूपिश्लेषेरुल्लेखनमनेकधा॥ कृहिस्लभेदादेकस्य सउल्लेखस्सतांमतः॥
रूव्येर्थयोगाभ्यां यथा॥ लक्ष्मीनिवासमटहमिमं सखिलानरेंद्रासो यातिभूमिरवनिरिपुरि धीरवर्गाः॥ विभावि
लासपदवीति खिलब्धवर्णाः श्रीकाकतीं इनगरीमनिशं स्तुवंति॥ श्लेषे तु यथा॥ नुग्रसपत्नेषु गुणेषु शास्वात्रामः प्रती

सुब्धेषु बद्धिषु केपितेषु गिरिषु स्तुत्सैव मुंच यमनू भीताः आकेलिवीररुद्रनृपतेः प्रत्यर्थिनः पार्थिवाः॥ अत्र रौद्ररसः
कृताहध्वनिरुत्पद्यते॥ मालोनिरवयं यथा॥ राज्ञामौलिविभूषणस्वगगमलादि कुंजरस्तो त्रयोस्फारं चामरत्त्व
णंधरणिभृन्वृंतेषु गेगासत्त्रिः॥ व्योमत्र फौस्सविता नमुज्वलतरं मुक्तांकुलापोभुवः स्फारं आकेतिवीररुद्रयशो
साजागर्त्ति विस्फूर्जितं॥ रुकम केहेतुरूपकं परंपरितं॥ रूपकद्वयमत्र व्यवस्थितं तथा दस्य न समस्तवस्तुवि
षयेन्तर्भावः॥ श्लिष्टकेवलपरंपरितं यथा॥ आकृतीयस्य दुग्धाब्धेयशोलोला महोर्मयः॥ दिक्कूलमुद्रजा
टोपाः खेलयुहकुषोद्भयाः॥ अश्लिष्टमालापरंपरितं यथा॥ दोरात्रीविषजिद्वयारिघुवनं श्रीणीमहोवा
सयाक्रोधोर्व्यानलक्रूरस्यपाज चरमार्योविद्विवासभ्रुवः॥ संहृष्यं चरणी विलासद्विलिनीसंवासयत्युग्रोज
गस्रासा दामलता कृपाणलतया श्रीरुद्रो नृपः क्रुध्यति॥ अश्लिष्टमालापरंपरितं वैधर्म्येणापि संभवति॥
त्रासांधकारमध्याह्नो केलवालपरात्मनः॥ जयंति वीररुद्रस्य रणप्राक्रमणकेलयः॥ प्रतापरुद्रदेवस्य मंड
लाप्रविधुंतुदः॥ अखंडविक्रमो दामग्रस्ततोराजमंडलं॥ श्लिष्टमालारूपपरंपरितं यथा॥ पद्मोल्लासस
हस्रभानुसंततन्सन्मार्गचर्या बुधः क्ष्माभृत्सप्रभिदामतिः कुवलयालंकारराकाशशी॥ निस्त्रोद्य सुमनो
विकाशसुरभिः कल्याणसंपत्सुरक्षोणीभृद्भुवनाश्रयो बुधिरयं श्रीवीररुद्रो नृपः॥ अश्लिष्टकेवलपरंपरि
तं यथा॥ एवमष्टविधस्य समासवाक्यगतत्वे षोडश भेदाः संति॥ अथ परिणामः॥ आरोप्यमाणमारोप्य
विषयात्मतयास्थितं॥ प्रकृतस्योपयोगित्वात्परिणाम उदाहृतः॥ आरोप्यमाणं प्रकृतस्योपयोगित्वेन सर्वा
लंकारव्याचष्टे॥ तत्र सामानाधिकरण्यवैयधिकरण्याभ्यां द्वैविध्यं॥ सामानाधिकरण्येन परिणामो यथा॥ किरी
टमाणिक्यमयूखजाले विश्वापुष्पांजलिमर्चयंते॥ फलार्थिनो रुद्रनरेंद्रपादपीठांतसीमानमरिक्षितींद्राः॥ समासो व्यवरो
पमाणस्य प्रकृतोपयोगे व्यवधानान्न परिणामो न भावः॥ विषयो विषयीत्यत्र सादृश्य॥ केविसंमतात्॥ संदेहगेव्योस्यात्तं

केयूरेणेषु शीमनः लीलासु लक्ष्म्याः पुरुषोत्तमस्त्रेयसान्वपूतेरुदंतपंकवींद्राः॥ साद्विविधा॥ विषयिनिगरेण विषयनि
गरणे च॥ विषयविषयिणोरन्यतरनिगरणेनाभेदप्रतिपत्तिरध्यवसायः॥ साद्विविधः॥ विषयिनिगरेण विषयनि
गरणे च॥ यत्रान्यधर्मसंबंधादन्यत्वेनोपतर्कितं॥ प्रकृतं हि भवेत्प्राज्ञास्तामुत्प्रेक्षां प्रचक्षते॥ यत्राप्रकृतक्रिया
गुणसंबंधादप्रकृतत्वेन प्रकृतस्य संभावना सोत्प्रेक्षा॥ साद्विविधा वाच्या प्रतीयमाना च॥ संभावनां प्रतिपा
दकानां नूनं प्राय इत्येवमादीनां प्रयोगे वाच्या॥ अप्रयोगे तु प्रतीयमाना॥ जातिक्रियागुणद्रव्याणां चतुर्णाम
ध्यवसायविषयत्वे साद्विविधा॥ प्रत्येकं चतुर्विधा॥ तेषां भावाभावरूपतया द्वैविध्ये अष्टविधा॥ अध्यवसाय
स्य गुणनिमित्तत्वेन क्रियानिमित्तत्वेन द्वैविध्ये प्रत्येकं षोडश प्रकाराः॥ निमित्तस्य वाच्यत्वगम्यत्वाभ्यां द्वैविध्यं॥
वाच्योत्प्रेक्षायामेव प्रतीयोत्प्रेक्षायामिवाद्यनुपादाने निमित्तस्य चाप्रयोगे उत्प्रेक्षाया निरवलंबनत्वापातात्॥
तथा जात्यादीनां स्वरूपेण हेतुरूपेण फलरूपेण चाध्यवसायविषयत्वे बहुविधायां वाच्योत्प्रेक्षायामपि हेतुफ
लयोरुत्प्रेक्षाविषयत्वेपि निमित्तस्योपादानमेव॥ तथा हि साध्येऽनुपात्ते साधननिर्देशो नान्वयं पुष्णाति॥ तथा
साधनेऽनुपात्ते साध्यत्वेन निर्देशोपि तयोरन्योन्यापेक्षित्वात्॥ हेतूत्प्रेक्षायां फलनिमित्त॥ तस्यानुपादाने क
थं तत्स्तुतिफलत्वेन घटते॥ यथा॥ प्रतापरुद्रनृपतेरपारे कीर्त्तिसागरे॥ मग्ना दुरितदुःकीर्त्तिसंगादिव जग
त्त्रयी॥ अत्रोत्प्रेक्षानिमित्तस्य मज्जनस्यानुपादाने संगादिति हेतूत्प्रेक्षा न शोभामावहति॥ जयश्रीवासपद्मस्य
विकाशायेव भानुमान्॥ प्रतिबिंबमिषात्खड्गं प्रविशत्येष भूभुजः॥ इत्युत्प्रेक्षानिमित्तस्य भानुमतः प्रवेश
स्यानुपादाने जयश्रीकमलविकाशायेति फलोत्प्रेक्षणमसमीचीनं॥ अतस्तत्स्वरूपोत्प्रेक्षायामेव निमित्तस्योपादाना
नुपादानाभ्यां द्वैविध्यं॥ अतस्त्रेधा वाच्योत्प्रेक्षाया भेदगणना॥ उपात्तगुणनिमित्तजातिभावस्वरूपोत्प्रेक्षा

त्तगुणनिमित्तजात्यभावस्वरूपोत्प्रेक्षा। उपात्तक्रियानिमित्तजातिभावस्वरूपोत्प्रेक्षा। उपात्तक्रियाजात्यभावहेतूत्प्रेक्षा।
उपात्तगुणनिमित्तजातिभावफलोत्प्रेक्षा। उपात्तगुणनिमित्तजात्यभावफलोत्प्रेक्षा। उपात्तक्रियानिमित्तजाति
भावफलोत्प्रेक्षा। उपात्तक्रियानिमित्तजात्यभावफलोत्प्रेक्षा। एवं चतुर्दशप्रभेदा जात्युत्प्रेक्षा॥ अनेनैव क्रमेण
गुणक्रियाद्रव्योत्प्रेक्षापि परिगणनीया। एवं वाच्योत्प्रेक्षायाः षट्पंचाशद्भेदाः। प्रतीयमानोत्प्रेक्षायाश्चाष्टाचत्वारिं
शद्भेदाः। तत्र स्वरूपोत्प्रेक्षायामपि निमित्तोपादाननियमात्। तस्या गम्यत्वे गुणरूपत्वेन क्रियारूपत्वेन चवा
च्यत्वविशेषाभावादेक एव भेदो गम्यते। गुणक्रिययोरुत्प्रेक्षाविषयत्वमुत्प्रेक्षानिमित्तत्वं च नुपगतं। प्राचामलं
कारप्रबंधेषु षष्ठवति भेदोत्प्रेक्षेति गणनामात्रं। चारुत्वातिशयस्तु षट्पंचाशत एव भेदानां। तत्र यथासंभ
वमुदाहरणानि। उपात्तगुणनिमित्तजातिभावस्वरूपोत्प्रेक्षा यथा। कीर्तिकाकुत्स्थवीररुद्रनृपतेः सिंहासना
ध्यासिनः। प्रत्यंभूमिसु जायशाः पिदध्यति कोटीन्दुतुल्यद्युतिः। रक्षादक्षिणराजलाभुजनितामंदप्रमोदो
च्छिता त्रैलोक्याट्टहासप्रभव ककुभां प्रांतेषु विघोलते। अत्र प्रभाशब्दो जातिवचनं। त्रैलोक्याट्टहासप्रभायाः कृ
विप्रोदोलि सिद्धत्वान्नोपमाशंकावकाशः। उपात्तक्रियानिमित्तजातिभावस्वरूपोत्प्रेक्षा यथा। वीरस्य रुद्रनृपतेः
प्रियवल्लभस्य राज्याभिषेकसलिलैः सुरभीकृतायाः सद्यः समुच्छ्वसितसांद्रपरागरेखा क्षोण्याः प्रमोदपुलकांकु
रमंजरीव। अत्र पुलकांकुरमंजरीवेत्युत्प्रेक्षायाः सुरभीकरणं क्रियारूपं। अनुपात्तनिमित्तजातिभावस्वरूपोत्प्रे
यथा। प्रतापरुद्रस्य नरेंद्रकांतिप्रणामभाजां पदयोः नृपानां। ललाटलग्ना विधिनिर्मिता या वर्णावली लोचनेन
दीपिकेव। अत्र दीपिकेति जातिवचनाज्जातिरुत्प्रेक्ष्यते। उपात्तनिमित्तजात्यभावस्वरूपोत्प्रेक्षा यथा। प्रता
परुद्रस्य गुणामृतामयोमिघो विजेतौ समलोकतागाः। प्रक्षालनास्कन्दत भूमिपालाः स्वाङ्गैर्बुभिः सेयति वी

रवर्याः॥ इति जात्यभावः॥ अनुपात्तनिमित्तजात्यभावोत्प्रेक्षा यथा॥ दिक्शाखेतुर्विश्व प्रथितमहसो रुद्रनृपतेर्जयप्र
स्थानोत्थखुरतुरगसंमर्दजनितं॥ रजःपुञ्जस्तस्य प्रतिबलमसूर्यामिव प्रतिदिवं प्रतापख्याना न्यादि क्षितिक्षि
विधत्ते दिनमणीन्॥ अत्रासूर्यातमिति जात्यभावः॥ जातिहेतूत्प्रेक्षा यथा। उदारश्री याभुजया प्रतापरुद्रस्य
विश्वैकधुरंधरस्य। विश्वंभराङ्कोमलशाख्ययेव विस्मारितां गात्रमहो धवलं॥ अत्र शाख्ययेति जातिहेतुत्वं॥ जा
त्यभावहेतूत्प्रेक्षा यथा॥ क्षमेरकूल्यवक्षत्वादिव वालाविञ्चितयन्त्राः सक्षात्काकृति। कविश्यागवैभवं॥ अत्र
कूल्यवक्षत्वादिति जात्यभावहेतुत्वं॥ उपात्तगुणनिमित्तजातिफलोत्प्रेक्षा यथा॥ नूनं विश्वंभराधारस्तंभीम
विलुकैवैलैमायये॥ वीररुद्रवेरुद्रस्य भुजावाजानुलंबिनौ॥ अथ स्तंभौमविलुम्पितिजातेः फलत्वं॥ उपात्त
क्रियानिमित्तजात्यभावफलोत्प्रेक्षा यथा॥ पद्मन वध्यानालोक्यस्त्रव्वः काकतीश्रितः॥ प्राथेणामानुपला
यन्नपवन्तिसमाश्रिता॥ अत्रामानुपलाप्येति जात्यभावस्य फलत्वं॥ उपात्तगुणनिमित्तक्रियास्वरूपोत्प्रेक्षा यथा॥
श्रीकाकतीन्द्रनृपतेर्दिग्गहगानानां श्वासोर्मिभिः सुपदिमर्मरितां तराला॥ तासां निवासविषये द्रुतखानबनानां
प्रसूनराशि ददतीव मरोवनाता॥ उपात्तक्रियानिमित्तक्रियास्वरूपोत्प्रेक्षा यथा॥ विमुखस्तति काकतीन्द्रि
तौ दृवनसीमा प्रिकृत्वा रकंटकाग्रा॥ चिकुरेषु विकृष्टती प्रतिशानद्दीने वनिजां तरप्रवेशं॥ अत्रादानेति क्रिया
भावः॥ उपात्तक्रियानिमित्तक्रियाहेतूत्प्रेक्षा यथा॥ उपात्तक्रियानिमित्तक्रियाफलोत्प्रेक्षा यथा॥ दृष्टोलि
सरन्मम हाजिगीप॥ प्रस्थानभेरीनिनदो घनमन्द्रः॥ वनादिवावेष्टुमरानिवर्गो नु विशाहन्ते श्लोलतु हांतरा
णि॥ उपात्तक्रियाभावफलोत्प्रेक्षा यथा॥ सोमाद्रिकुंजेषु विहारभाजः सिद्धांगनाकल्पित-चंद्रिकाघ्रान्
श्रीवीररुद्रस्य यशोविलासा नगाय संसंस्पृष्टुमिवाधकारं॥ अत्र संस्पृष्टुमिति क्रियाभावस्य फलत्वं॥ अनु

स्ता॥

पात्तनिमित्तगुणस्वरूपोस्ते यथा। चकास्ति काकतींद्रस्य क्रियालोकनविभ्रमे। प्रकृतिस्वपि सर्वासु प्रसादस्वम
त्तिमान्॥ नुपात्तगुणनिमित्तगुणाभावस्वरूपोस्ते सायथा। प्रतापरुद्रस्य महाभिषेकपयस्कृतेः शिलाति
नाखिलांगा। प्रशांतभारार्तपुरंदरमद चांसानिलेष्वेव विभाति पृथ्वी॥ अत्र शांतोष्णेति गुणाभावः॥
नुपात्तनक्रियानिमित्तगुणहेतुरुस्ते सायथा॥ जयश्रिया मात्रयनाप्नुपैति श्रीवीररुद्रस्य रणोद्भवाः॥
प्रामुस्थिति वैरिमहीपतीनां समुत्सुकाभ तुम मनस्य पश्य वा। अत्रासक्ययेतिगुणस्य हेतुत्वं। उपात्तक्रियानि
मित्तगुणाभावहेतुरुस्ते सायथा॥ जातावयसं प्रतिवीररुद्रनरेंद्रगंभीरिमगुत्स्यदम्भाः॥ इयप्रमोदाद्दिव
जीवनेषु मालिन्यमं भोनिचयेभजंते॥ अत्र प्रमोदितिगुणाभावस्य हेतुत्वं। उपात्तक्रियानिमित्तगुण
फलोस्ते सायथा। जगीषां विषधमात्राणां नेम स्यार्थमि वोत्सुका। भुजंगयः काकतींद्रस्य गुणानुगानुसृथा
मुपः॥ अत्र नेमस्यार्थमितिगुणस्य फलत्वं। उपात्तक्रियानिमित्तगुणाभावफलोस्ते सायथा॥ अरण्य
वासादितलबांधवासु मृगीश्च वैरार्थमिवाग्रहरण्याः॥ त्रिलिंगदेशेश्वर वैरिनार्यः पराङ्मुखालोचनविभ्रमे
षु॥ अत्र वैरार्थमितिगुणाभावस्य फलत्वं। अनुपात्तनिमित्तद्रव्यस्वरूपाभावोस्ते सायथा। ननियम
स्मिन्नुपरिपूर्णतेति यस्मान्नभःश्रोणितलावतीर्णः॥ आनंदयन्निंदुरिव स्वधाम्ना विभाति लोके नव
काकतींद्रः॥ अनुपात्तनिमित्तद्रव्यस्वरूपाभावोस्ते सायथा॥ अनन्यसाधारणदानशौंडेस्यः कृतार्थो
भवदर्थिसार्थे। श्री काकतींद्रे पृथिराजमाने कोपाणिजाले नविनाकृतेव। अत्रदिवःपारिजातासावा दुस्ते
सायथा। प्रतापरुद्रदेवेन कुभृत्स्यकृत्य विज्जृंभिता॥ समुज्जृंभितमामरला दपरेणेव वज्रिणा॥ उपात्त

क्रियानिमित्तद्रव्याभावहेतुत्वोदाहरणं यथा। काकतीयक्ष्मापो भवि लीनाभेन मेरुणा॥ असुवर्णचलेनैव विस्मितैर्ध्योकुली
कृतः॥ अत्रासुवर्णचलेनेति हेतुस्वभावः॥ न नं प्रतापरुद्रेण यशोदिक्षु प्रसारितं। अत्र दुग्धार्णवशातायेतिफलत्वं।
नुपात्तनिमित्तद्रव्ये फलोदाहरणं यथा॥ दुग्धार्णवशातायेति कैलासाचलकोटयः। वीररुद्रनरेंद्रस्य जयप्रस्थानसं
भवं॥ रजोपिहितदिष्टोलं निराकाशमिवोत्थितं। अत्र निराकाशमिति जाकाशणाभावाये सृष्टेः॥ इति श्रीमहोपाध्या
यविद्यानाथकृतौ प्रतापरुद्रयशोभूषणेऽलंकारशास्त्रे आरोपगर्भोऽलंकारप्रकरणं॥ ॥४॥ विषयस्यानुपादानविषय
प निबध्यते॥ यत्र सातिशयोक्तिः स्यात् कविप्रौढोक्तिजीविता। यत्र कविप्रौढोक्त्या विषयविषयो न तु विषयीनिब
ध्यते सातिशयोक्तिः स्त स्याश्चातुर्विध्यं। भेदेऽभेदः॥ अभेदे भेदः॥ संबंधेऽसंबंधः॥ असंबंधे संबंध इति।
कार्यकारणयोः पौर्वापर्यविपर्ययरूपं त्वनाध्यवसायस्तु व्यतिरिक्तैव। किंतु प्रौढोक्तिमूलत्वादतिशयोक्तिरित्युच्य
ते॥ तत्र भेदेऽभेदो यथा॥ स्थाने कल्पतरुर्जातः काकतीयमहोदधेः। लक्ष्मीपतिरसौ चित्रं मर्त्यरूपमहो
त्सवः। अत्र प्रतापरुद्रकल्पकतरुत्वयोर्भेदाध्यवसायः॥ अभेदे भेदो यथा॥ अन्यं महदन्यदेव महितः
कोप्येष गंभीरिमा काव्यन्यासरणी प्रतापयशसोरन्यैव बाह्वोः प्रथा। सर्वं नूतनमेव रुद्रनृपतेर्नानेन तु
ल्यनिर्मितो सामग्री चतुराननेन क्रियती किं तु कुत्रापि कल्पिता। अत्र यादवीस्तत्तयाभेदेपि भेदः कल्पितः॥ तत्र स्व
त्वसिद्धप्रौढोक्तिसिद्धयोरभेदाध्यवसायः। संबंधेऽसंबंधो यथा॥ श्रीलाचित्तारत्नं तरुरमरद्वारवीपभुरसौ
विधन्हेनुस्वैर्जगदपि लघादोषविधुरं। न सृष्टिर्वैधात्री तदिव चतुरस्त्राक्षयमियं स्पृशेद्वीरुद्रस्य सकलगुण
साम्राज्यनिलयं॥ अत्र विधातृसृष्टिसंबंधेपि असंबंधकल्पः॥ अतीतब्रह्मसृष्टीनामीश्वरेण त्वाध्यवसायः
असंबंधे संबंधो यथा॥ ब्रह्मन्नमस्ते गिरो हृतेपि किमिदं नैव विधास्ते मुदस्वाभिः सत्यमयि त्रियाद्यपलिता॥

यद्वीरस्य द्रुः स्फुटः ॥ मिथ्या किं तु विकसे त्रिजगत्त्राणाय मत्सार्थितः शंभुः क्ष्मामवतीर्णवानिति कथा जाता हरिस्त्रि
लपणोः ॥ अत्र हरित्रिविष्टपयोरेवंविधगृह्यमसंबंधेपि संबंधउक्तः ॥ स्वप्रभुनासमं काकुत्स्थीं दृष्ट्याप्तेदध्यवसा
यः ॥ कार्यकारणयोः पौर्वापर्यविपर्ययरूपातिशयोक्तिर्यथा ॥ मानुः कथं काकुत्स्थीनाथ दृष्टेरग्रेसराः कामशराः प
तंति ॥ तद्रूपलावण्यजितस्मरेपि न नंगतः किं कुरुताममुष्य ॥ अत्र कार्यस्य तस्य स्मरशरपातस्य कारणा
त्प्रतान्प्रियदृष्टिपातात्पूर्वकालत्वमुक्तं ॥ अथोक्तिसाम्यालंकारनिरूपणातिशयोक्तिहेतुकासहोक्तिर्निरू
प्यते ॥ सहार्थेनान्वयो यत्र स्यादेवं दृतिशयोक्तितः ॥ कल्पितौपम्यपर्यंतां सामता सा सहोक्तिरिष्यते ॥ अत्र
भेदप्रभेदरूपया कार्यकारणपौर्वापर्यरूपया वातिशयोक्त्या एकस्य प्राधान्येनान्वये इतरस्य सहार्थेन संबंधे
उपमानोपमेयभावपरिकल्प्यते ॥ तत्र सहोक्तिः ॥ प्राकरणिकाप्राकरणिकविषयत्वादुपमानोपमेयत्वावस्य
सहार्थसंबंधेन द्वयोरपि प्रकृतत्वात्तदर्थता ॥ कार्यकारणपौर्वापर्यविपर्ययरूपातिशयोक्तिमूला सहो
क्तिर्यथा ॥ प्रध्रस्याभस्सुभटासिधाराणेषु नीलासुपलपत्रभासा ॥ पतंति कर्णोष्वरिभूपतीनां सार्कं सुर
स्त्रीजनमुकुमाल्यैः ॥ अत्र कृपाणपतत्तोतरभाविनो दिव्यमाल्यपतनस्य सहकालत्वमुक्तमिति पौर्वा
पर्यविपर्ययः ॥ भेदेभेदरूपातिशयोक्तिश्लेषगर्भाभेदाध्यवसायरूपातिसहोक्तिर्यथा ॥ दिने दिने रुद्दनरा
धिपस्य प्रतापलक्ष्मीरुदयं प्रयाति ॥ प्रकाशिताशेषदिगंतराला विवस्वतासार्धमनिंद्यभासा ॥ अत्रोदयं
प्रयातीति श्लेषेण उदयपर्वताभ्युदययोरभेदाध्यवसायः ॥ अथ सहोक्तिप्रतिपक्षरूपा विनोक्तिर्निरूप्य
ते ॥ विनासंबंधियत्किंचिद्यत्रान्यस्य परापतेत् ॥ अरम्यतारम्यता वा सा विनोक्तिरनुस्मृता ॥ यत्रैक
स्य चिदसंनिधानात् हस्तरम्य मरम्यमपि भवे सो विनोक्तिर्द्विविधा ॥ अरम्यता यथा ॥ अत्तापर ददेवस्य

गुणवर्णनं यद्विना। कीदृशी काव्यरचना संभृणुध्वं कवीश्वराः। अत्र प्रतापरुद्रगुणवर्णनेन विना काव्यश्रिया मशो
भनत्वमुक्तं। अनेन काव्यशोभाभिवृद्धिः कविभिः प्रतापरुद्रस्य गुणवर्णयितव्या इति विधिरेव प्रकाशते। रम्यता
यथा। कृतापर्णेन्दिः संजयति जगतीं दोः त्रिजगतां वपुर्भासानंदं विमलविभवे रुद्रनृपतौ। विनालक्ष्मप्राप्य
प्रकृतिदिनमपूर्णो निजतनुं प्रकाशस्यादित्ये दिदिविक्तवेसोपि सुभगः॥ अत्र प्रतापरुद्रे प्रकाशमानेचंद्रम
सः कलंकेन विनाशोभनत्वमुक्तं॥ सकलगुणशालिनः प्रतिपक्षस्य पुरस्ताद्दृशगुणवत्त्वेव रम्यता नान्यथे
ति। विशेषणानां तौल्येन यत्र प्रस्तुतवर्त्तिना। अप्रस्तुतस्य गम्यत्वे सा समासोक्तिरिष्यते। यत्र प्रकृतवि
शेषणसाम्यादप्रस्तुतं गम्यते सा समासोक्तिः॥ त्रिविधं। विशेषणसाम्यं श्लिष्टं साधारणमौपम्यगर्भं चेति।
श्लिष्टविशेषणं यथा। सद्योविश्लथमेखलां पुलकितामञ्चीतनुं बिभ्रति रागाद्रेश्वरपतेः कृपाणलतिका स्वग
शानिकर्णेषु रीन्। तद्योगादनुरक्तभावविवशा संमीलिता स्मापरं मन्ये ततः कृपणा भजं लिखल्लुते भावस्थिति
कामपि। अत्र विश्लथमेखलां पुलकितामिति श्लिष्टविशेषणमहिम्ना कृपाणलतिकायां नायिकात्वप्रतीतिः।
अनुरक्तभावविवशा इत्यादिविशेषणद्वारा रिपूणां नायकत्वप्रतीतिः॥ साधारणविशेषणेन यथा। वीतव्रीड
मपास्तमानमुदयन्वेस्वयं मविभिर्न व नूसांकनिर्भरागात्रवेपथुमिलन्नम्रछीवलद्बाष्पकं। संजातप्रलयं चक्षा
क्ती महीनाथ स्मरोद्दृप्तितान्नपाः शैलगुहासु यांति विजनेभीत्या समालिंगिताः॥ अत्र शृंगाररसस्यानुकूसा
धारणविशेषणबलात् भीतिसमालिंगिता इति नृपाणां नायकत्वप्रतीतिः॥ औपम्यगर्भविशेषणेन यथा।
स्फुतासीगुणरत्नौघैः पूर्णः सौजन्यवारिणा। प्रतापरुद्र नृपतिर्धत्ते विश्वंभरास्त्रियं। अत्र समासोक्तो सर्व
त्रव्यवहारसमारोपण एव जीवितं। स चतुर्विधः॥ लौकिकवस्तुविलौकिकवस्तुव्यवहारसमारोपणं शास्त्रीयवस्तु

२ व्यवहारसमारोपश्चेति द्विविधः ॥ तत्राद्या शास्त्रीये वस्तुनि शास्त्रीयवस्तुव्यवहारसमारोपः लौकिकवस्तुव्यवहा
रसमारोपश्चेति ॥ एवं चतुर्विधा ॥ यथाक्रममुदाहरणानि ॥ सहसागरस्फुरदुद्दामदानलक्ष्मी विराजिता ॥ प्रताप
रुद्रेभद्रास्तनुते सार्वभौममत्तां ॥ अत्र लौकिके प्रकृतवस्तुनि लौकिकस्य सार्वभौममत्तनामधेयस्य दिग्गजस्य
व्यवहारप्रतीतिः ॥ तथा ॥ मरुत्प्रमाणेन निजेन सद्यस्त्विरस्फूर्तो ध्वस्तातिपक्षहेतौ ॥ प्रतापरुद्रस्य स्मितस्फुरद्गोऽत्रव
द्रसहतरखंडनपंडितत्वं ॥ अत्र लौकिके खड्गे तर्कशास्त्रप्रसिद्धवस्तुव्यवहारारोपः ॥ तथा ॥ जयपर्वा — — गुरु
णापि तत्सारस्यपदवीं श्रुतिशाख्यं नु त्वं किमपि कलयंति प्रतिपदं ॥ प्रबंधश्रीवीरक्षितिभुजि कवीनां विजयते
बुधश्रेणीयस्यां निपुणमविकर्तुं प्रभवति ॥ अत्रालंकारशास्त्रीये वस्तुनि तंत्रशास्त्रप्रसिद्धवस्तुव्यवहारा
रोपः ॥ तथा ॥ सालंकारा लसद्वृत्ता सगुणा रसनिर्भरा ॥ सा वानुबंधिनी भाति सारतीका कृतीश्वरे ॥ अ
त्रालंकारशास्त्रीये वस्तुनि सारस्याख्ये लौकिकनायिकाव्यावहारसमारोपः ॥ समासोक्तेर्विक्षेपा विशेष्यस्यो
त्पादनात् श्लेषाद्विशेषः ॥ उक्तिसाम्येऽपि श्लेषगुणौ द्वौ निरूप्यते ॥ अन्यपोक्तस्य वाक्यस्य कार्यश्लेषेण
वास्तवेन ॥ अन्यथा योजनं यत्र सा वक्रोक्तिर्निगद्यते ॥ यत्र कयाचिद्विवक्षया केनचित्प्रयुक्तस्य वाक्यस्यान्ये
नान्यथा विवक्षया योजनं क्रियते सा वक्रोक्तिः ॥ उक्तिवक्रत्वे कथंचित्संप्रवक्तव्यस्यापि एवं विलक्षणात्सावान्
सर्वालंकारेभ्यो वैलक्षण्यं काकायथा ॥ बहुबलहो रवुराएस गेहे तं सासिरिरिएपि सरासंति ॥ एयनासिरिए
तु विलु मंजेपाणं किसुल हसि ॥ बहुवल्लभः खलु राजा सखि तस्य प्रियां निर्भरा शक्तिः ॥ न्यूनोऽप्रियोऽपि
त्वमात्मानं किंतु लघु करोषि ॥ अत्र त्वमपि प्रियोन्यून गुणा न भवसि ॥ अतस्त्वयि न पतति रासल एव ॥
किमित्यात्मानं लघु करोषीति काकुः प्रतीयते ॥ श्लेषेण यथा ॥ कस्ते सुंदरि वर्त्तते हृदि सदा राजा किमिंदुर्नेहि

पिनृतिलककुसुमेस्तरविकिंन्नोरुद्रदेवोविभुः॥ ईर्ष्याः किं सखि सस्यमास्यसुभगे त्वं गोत्रसख्यो द्रवेसाख्यां खल्वचराद्वासवा
चिविरहं किंचिद्दधत्यस्मरन्॥ अथ स्वभावोक्तिर्निरूप्यते॥ स्वभावोक्तिरसौ चारु यथावद्वस्तुवर्णनं॥ यत्र चारुतया
वस्तुनो यथावद्वर्णनं निबध्यते सा स्वभावोक्तिः॥ मदच्युतानस्तितकर्णमुद्धूतमभ्रांत्रपदस्थितेन॥ लीलाग्रहस्ते
न नाजेन जातो निद्योत्सुकः काकतीवीररुद्रः॥ उक्तिसाम्याद्व्याजोक्तिरुच्यते॥ व्याजोक्तिः सा समुद्भूतवस्तु यत्र
निगृह्यते॥ यत्र प्रकाशवस्तु निगूहनहेतुना केनचिद्व्याजेन प्रच्छाद्यते सा व्याजोक्तिः॥ यथा॥ क्षोणीवाणी
ग्रहणसमयेसंमदान्नोमहर्षेसर्वांगीनो नृपतितिलकः काकतीयान्वयेंदुः॥ धीरोदात्तोद्धिरसिसलिलैः
किंतु राज्याभिषेकः कर्त्तव्यस्यान्न दति मद्रुहसन्वीक्षते मंत्रिवर्गान्॥ अत्र क्षोणीवाणीग्रहजनितं रोमहर्षं
धीरोदात्तनया प्रतापरुद्रदेवेन महाभिषेकसलिलसेकव्याजेन प्रजादयता मंत्रिणोपहसन्ते॥ व्याजो
क्त्या किंचित्साम्यान्मीलनमुच्यते॥ मीलनं वस्तुना यत्र वस्त्वंतरनिगूहनं॥ यत्र वस्तुना वस्त्वंतरं प्रच्छादितं भ
वति स मीलनालंकारः॥ स द्विविधः॥ सहजेनागंतुकतिरोधानं॥ आगंतुनैवा सहजस्य निगूहनं॥ यथाक्रम
मुदाहरणं॥ उग्रेः काकतिवीररुद्रनृपते दोर्दंडविजृंभितैर्युद्धेः प्रावृण वर्जितेषु पतिषु क्ष्मापि प्रलीनास्वसु
विष्वन्तिर्वृत्तिरस्मरज्वरजुषामंगे द्विषद्योषितां॥ संक्रांतोपि न लक्ष्यते पथिमहनूष्माचिरं मारवः॥ अत्र
सहजेन रिपुकामिगतेन स्मरानुलोष्मणा मार्गवशादागंतुकऊष्मा तिरोधीयते॥ यथा॥ प्रतापरुद्रस्य भुज
प्रतापानलभयाद्भूमिभुजामजस्रं॥ स्वदा सकंपाध्रुदयेप्यनंगगोष्ठ्यां स्त्रियः प्रेक्षिणविभ्रवसंति॥ अत्र स्व
यजनितेन कंपादिनागंतुकेन सहजस्य प्रेमजनितकंपादेस्तिरोधानं॥ सामान्यं गुणसाम्ये॥ न यत्र वस्त्वं

तरेकृता ॥ यत्रैकस्य वस्तुनो गुणसाम्येन वस्त्वंतरैकात्म्यं प्रवर्तितस्स सामान्यालंकारः ॥ कैलासे दुग्धार्णवे यान् हंसे
घलक्ष्ति तेष्वंध्रनरेंद्रकीर्त्तौ ॥ त्रयः पुमांसः प्रथमं वसंते स्वसेवकान्से भ्रमतो विलोक्य ॥ अत्र प्रतापरुद्रन
रेंद्रकीर्त्तौ जगत्सु विजृंभितायां कैलासप्रभृतीनां विमलवस्तूनां वस्त्वंतरैकात्म्यं ॥ इतरगुणसंनिधानात्विश
यस्साम्यात्तद्गुण उच्यते ॥ तद्गुणः स्वगुणत्यागादन्योत्कृष्टगुणग्रहः ॥ यत्र न्यूनं स्वगुणं विहाय संनिहितव
स्तुनस्सकाशादुत्कृष्टगुणः स्वीक्रियते स तद्गुणालंकारः ॥ प्रतापरुद्रदेवांघ्रिनखज्योत्स्नाविजृंभितैः नम
न्नृपतिमाणिक्यमौलयश्शुचयः कृताः ॥ अत्र प्रणमतो नृपतीनां मुकुटाः स्वां शोणप्रभां संत्यक्त्वा कृतींद्र
पदज्योत्स्नाविजृंभितैः धवलिमानमुद्वहंति ॥ तस्मादिति पद्यादतद्गुणो निरूप्यते ॥ सतिहेतावतद्रूपस्वी
कारः स्यादतद्गुणः ॥ यत्र संनिधानरूपहेतौ सत्यपि अन्यगुणस्वी कारो नास्ति स अतद्गुणः ॥ यथा ॥
ईशानं सन्निधाय जगत्सु तितल्लीलाहासोज्वले देव्या यिं परितस्तदंगविलसन्नीलद्युतिद्योतिते ॥ ब्रह्मांडं
निकषाचरस्य नु मिलल्लसत्स्वर्णप्रभाभासुरे पुष्यन्नरुद्रनरेंद्रकीर्त्तिविभवस्स्वामेव मुग्धां छविं ॥ अत्र हरि
हरविरिंचीनां समीपवर्त्तिषु जगत्सु तत्तन्नानाप्रभासमग्रेष्वपि निरंतरं विहरमानस्य प्रतापरुद्रनरें
द्रयशसो निरंकुशस्वकीय एव धवलिमा विजृंभते ॥ अतद्गुणे किंचिदाक्रांतत्वान्विरोधस्य विरोधालंका
रो निरूप्यते ॥ आभासत्वे विरोधस्य विरोधाभास इष्यते ॥ यत्र प्रथममाभासतया प्रतीतो विरोधः पर्यव
साने परिहीयते स विरोधालंकारः ॥ तत्र जातेर्जात्यादिना सह विरोधे चत्वारो भेदाः ॥ क्रियायाः क्रिया
गुणद्रव्यैः सह विरोधे त्रयो भेदाः ॥ गुणस्य गुणद्रव्याभ्यां विरोधे द्वौ भेदौ ॥ द्रव्यस्य द्रव्येण सह विरोधे

एको भेदः॥ एवं दश विरोधभेदाः॥ जातेर्जात्या क्रियया च विरोधो यथा। कमलाकरोपि सततं नितरामजडाशयो
यममुक्तश्रीः। विमलतरवारिधाराप्यासीद्वैरिस्थितिग्मतापकारी। अत्र पूर्वार्द्धे जात्योर्विरोधः। कमलाकरोप्यज
डाशय इति विरोधः। उत्तरार्द्धे जातिक्रिययोर्विरोधः॥ विमलतरवारिधारायाः संतापकरणात् अत्र श्लेषमूलो
विरोधः॥ जातेर्गुणद्रव्याभ्यां विरोधो यथा॥ उपमदस्सावर्णो मोपि भास्वानपि कलानिधिः। वीररुद्रनरेंद्रो
यमद्भुतानंदविहारभूः॥ अत्र सावर्णो मोपि श्रमद इति जातिगुणयोर्विरोधः॥ भास्वानपि कलानिधिरिति
जातिद्रव्ययोर्विरोधः। कलानिधेरेकत्वाद्द्रव्यत्वं॥ अत्रापि श्लेषमूलता॥ क्रियायाः क्रियया विरोधो यथा।
धर्मद्विषामर्थमुखां च भंगमापादयन्काकतीवीररुद्रः॥ त्रिवर्गसाधारणगोचरोपि करोति कामद्विषि भावभा
दं॥ अत्र त्रिवर्गसाधारणत्वेन धर्मापि विरोधिपुनर्भंगकरणं। कामारोप्ये हवकरणं च विरुद्धं॥ क्रियायाश्च गुणद्र
व्याभ्यां विरोधो यथा॥ एष त्रिशुविहारोपि गोत्रवात्सल्यलालसः॥ करोति कमलोल्लासं राजाप्ययं धनरेश्वरः॥
अत्र त्रिशुविहारस्य गोत्रवात्सल्यमिति क्रियागुणयोर्विरोधः॥ कमलोल्लासं कुर्वन्नपि राजेति क्रियाद्रव्य
योर्विरोधः॥ अत्रापि श्लेषमूलतेव॥ गुणस्य गुणेन विरोधो यथा॥ राजंतो भुवणंणराजंति जएसिलाखा
हत्तिं जोसि। रुद्दनरिंद करंसारं ता विअपंडराजा न्त॥ रंजयन्नपि भुवनमिदं राजेति यया श्लाघनीयोसि।
रुद्रनरेंद्र कृपासारं तापि च पांडुरा जाता। अत्र रक्तत्वपांडुरत्वयोर्विरोधः॥ गुणस्य द्रव्येण विरोधो यथा।
ज्वलनप्रतापरुद्रोपि काकतीयनरेश्वरः। भवाजे वात्तकोतिश्चाम्विधिप्रियंकरः। अत्र प्रतापरुद्रवितिजैवा
त्रक इति गुणद्रव्ययोर्विरोधः। द्रव्यस्य द्रव्येण विरोधो यथा। विभाति काकतीं रुद्रोयं तद्दोपि चतुराननः। तथा

वज्रिद्विषुरित्येष कृष्यन्ते पुरुषोत्तमः ॥ एवं दृष्टान्तेदादर्शिताः । कथमप्यश्लेषेणापि संभवतियथा ॥ स्वभावशिशि
रादृष्टिरयिका कृतिभूभुजः । सर्वागतापिनीजाता प्रतिपक्षमहीक्षिता । अत्र स्वभावशिशिरापि तापिनी
ति विरोधः ॥ अथ विरोधगर्भालंकारा उच्यंते । आधाररहिताधेयमेकं चानेकगोचरं । अशक्यवस्तुकर
णं विरोधालंकृतिस्त्रिधा । आधारमन्तरेणाधेयो निरूप्यते स एको विशेषः ॥ एकस्यानेकगोचरत्वे द्वितीयो
विशेषः । प्रकृतस्याशक्यवस्त्वंतरकरणे तृतीयो विशेषः । यथाक्रममुदाहरणानि ॥ नलनहुषदिलीप
धर्मपुत्रप्रभृतिनरेश्वरसंप्रतायशः श्रीः ॥ अनुदिनमधुनाप्युपेयमेत्री विलसति काकुतिवीररु
द्रकीर्त्या । अत्र प्राक्तननृपतीनामाधारभूतानां तिरोधानेप्यावेशायाः कीर्तेरवस्थानं ॥ यथा च । पश्यं
तोभयविदुलाः प्रतिनृपाः पश्चात्पुरः पार्श्वयोरप्यंतर्बहिरंध्रपार्थिवप्रतिज्ञोत्क्षिप्तकोशेयकं ॥ निस्सीमो
दयावनव्युतिकरप्रभ्रष्टदेशा यथा क्रोधेल मदंतिकं प्रविगलद्धैर्या भीयश्च्योयक्रिया । अत्र भयभ्रांतानां
शत्रुनृपतीनां प्रतापरुद्रनृपतिरेकोप्यनेकत्र प्रतीयते ॥ यथा च । अपारकरुणानिधेस्सदसि वीररुद्र
प्रभोः प्रसादमधुरस्खलत्तालगतियत्र दृष्टिर्जने ॥ प्रतीद्रमतिकिन्नराधिपमहोजकोषोन्नतं नवंकि
मधितिष्ठति त्रिभुवनेश्वरसर्वाधिक ॥ अत्र साधारणो जनः प्रतापरुद्रदृष्टिपात्रीभूतः ॥ किंकिं न लभ्य
तइत्यशक्यवस्त्वंतरकरणमिति ॥ आधाराधेययोर्वैचित्र्याद्धिकालंकारो निरूप्यते । आधाराधेय
योरानुरूप्याभावोधिको मतः ॥ यत्राश्रयाश्रयिणोरानुरूप्यं नास्ति सोधिकालंकारः ॥ सद्विविधः । आ
श्रयात्स्थत्वमहत्त्वाभ्यां ॥ प्रथमोयथा । स्तोकेप्रलांड खंडे विपुलतरतया स्वैरसंचारहेला संकोचाद्दूरा

शीघ्रवदतनुरसबोकाकर्तीं दस्य कीर्तौ ॥ एते प्रालेयपृथ्वीधररजतगिरिस्वर्णशैलभानुक्षीरांभोराशिमुख्याः प्रकटित
मधुना तद्धनीभावरूपं ॥ अत्र प्राप्तस्य स्वरोदः कुहरस्यास्य तमाश्रितस्य प्रतापरुद्रस्य यशसो वैपुल्यं ॥ अपि द्वा
पिकलिंगमालवमहाराष्ट्रांगवंगादयो भूपास्ता दृढासैन्यवैभवसमाक्रांतालताशान्तरा ॥ लीनाः कृतिवीररुद्रनृप
ते व्यूहप्रपंचाश्रया निस्त्रीनेवलवारिधौ विदधते पूर्तिं नको णेप्यहो ॥ आश्रयस्य प्रतापरुद्रसैन्यांबुधेर्वैपुल्यं ॥
आश्रितानामंगवंगकलिंगप्रभृतीनां राज्ञामनीषीं नीनामल्पत्वं ॥ अथ विभावनालंकारः ॥ कारणानि विना का
र्यस्योत्पत्तिस्तु विभावना ॥ तत्सामग्र्यामनुत्पत्तिर्विशेषोक्तिर्निगद्यते ॥ यत्र प्रसिद्धकारणपरित्यागेन कार्यस्यो
त्पत्तिर्निगद्यते सा विभावना ॥ यत्र कारणसाकल्ये सत्यपि कार्यानुत्पत्तिः सा विशेषोक्तिः ॥ यथा ॥ प्रतापरुद्रेण
परागितानां प्रत्यर्थिनां विध्यगुहागतानां ॥ तमांस्यरात्रौपि समुद्भवंति तेजांसि घस्रेष्वपि नोद्भवंति ॥ अत्र तम
प्रादुर्भावस्य प्रसिद्धकारणं रात्रिः ॥ तयापि विनापि तस्योत्पत्तिर्निबद्धा ॥ अप्रसिद्धकारणं शोकाद्यस्त्येव ॥ तथा प
हस्सु कारणेषु सत्सु अपि तेजसोनुत्पत्तिरिति ॥ अत्र निष्प्रतापादिवादि निमित्तमस्त्येव ॥ कार्यकारणविरोधप्रसंगा
दसंगतिरुच्यते ॥ कार्यकारणयोर्भिन्नदेशत्वे सत्यसंगतिः ॥ यत्रैकदेशवर्त्तिनोरपि कार्यकारणयोर्भिन्नदेशस्थि
तिर्निबध्यते सा सावसंगत्यलंकारः ॥ यथा ॥ विभ्रत्सु वर्धरांगुवर्वीररुद्रनरेश्वरे ॥ भवंत्यनितरां — वंनभ्रा
स्सामंतमौलयः ॥ अत्र राज्ञि भूभारः अन्यत्र शत्रुषु नमनमिति ॥ विरोधप्रस्तावादि चित्रं निरूप्यते ॥ विचित्रं
स्वविरुद्धस्य फलस्यावाप्त्यर्थमुद्यमः ॥ यत्र स्वविरुद्धफलप्राप्त्यर्थमुद्योगः क्रियते स विचित्रालंकारः ॥ यथा ॥
प्रतापरुद्रनृपतेरग्रे दूरान्नरेश्वराः ॥ उपवरोहंति हस्तिन्यस्तानरोदुमनर्गलम् ॥ अत्रावरोदुमवरोहंतीति वि

परीतफलप्राप्त्यर्थप्रयत्नः॥ अथान्योन्यं निरूप्यते॥ तस्यापिचित्रोभ्रमलतेति॥ तदन्योन्यंमिथोयत्रोत्पाद्युत्पादक
ताभवेत्॥ यत्रपरस्परक्रियाद्वारकमुत्पाद्योत्पादकत्वं तदन्योन्यालंकारो यथा॥ आरोहता रुद्रनरेश्वरेण वीराज
लक्ष्मीकृतीराजपीठं॥ आरुह्यते नोज्ज्वलरत्नभाजा राजा जयिलक्ष्मीमधिकां बिभर्ति॥ अत्र प्रतापरुद्रभद्रासन
योरन्योन्यालंकार्यत्वं॥ अत्र विरोधगर्भो विषमालंकारः कथ्यते॥ विरुद्धकार्यस्योत्पत्तिर्यत्रानर्थस्य वा भवेत्॥
विरूपघटना वासौ विषमालंकृतिस्त्रिधा॥ यत्र कारणाद्विरुद्धकार्यस्योत्पत्तिस्तदेकं विषमं॥ जकार्यभ्रंस्तस्या
नर्थस्योत्पत्तिर्द्वितीयं॥ विरूपयोर्वस्तुनोः संघटनं तृतीयं विषमं॥ प्रथमं यथा॥ राज्ञः काकतिवीररुद्रनृपतेः
खड्गात्तमालप्रभाद्दुग्धांभ्रारदिंदुकांतिधवलां कीर्तिश्रियं पश्यता॥ लोकानांमुरवैरिपादकमलात्तांवियन्नि
म्नगांश्रुत्वासंप्रतिविस्मयाद्विरमतिप्राप्तानुभावंमनः॥ अत्रातिनीलवर्णात्खड्गाद्धवलस्य यशस्समु
त्पत्तिः॥ द्वितीयं यथा॥ जातास्ते जययाशरिपुभूतानां संग्रामसीमानमुपागतानां॥ प्रतापरुद्रस्य विलोकनेन
म्रियंतिजीवैः सममायुधानि॥ अत्र समरोद्योगेन केवलं विजयस्यानुत्पत्तिर्यावज्जीविनंदानरूपानर्थोत्प
त्तिरपि॥ तृतीयं यथा॥ कुंभपाला दृग्विभवमहनीयप्रभृतयः कुचेयेकांतारस्थितिरांदी ववृक्षतेकनिलयाः॥ इ
तिप्रेक्षं प्रेक्षं वनभुवि रिपुरुद्रनृपतेः प्रतापश्लाघं ते शबरवरवीराः प्रतिदिशं॥ अत्र महानगरनिवासयो
ग्यानां राजानदिवानां विरूपाणां संघटनं॥ एवं विरोधगर्भमलंकारा निरूपिताः॥ अथानुविषमवैधर्म्यात्समं
निरूप्यते॥ सा समालंकृतिर्योगे वस्तुनोरनुरूपयोः॥ यत्रान्योन्यानुरूपपदार्थसंघटनाक्रियते स समालंका
रः॥ बिंजाज्ञोसकलाजालेसी एससप अवरुदंमि॥ संसुटिओ पासुसविजसंभो उकजंघो जयंवल्ल॥ अत्रप्र

तापस्तद्देणसकलविद्यानां लक्ष्यादप्रयोग्यः॥ अथ गम्योपम्यालंकारप्रस्तावः। प्रस्तुतानां तथान्येषां केवलं तुल्यधर्मतः
औपम्यं गम्यते यत्र सा मता तुल्ययोगिता। यत्र केवलप्रस्तुतानां वा समानधर्मसंबंधादौपम्यं गम्यं सा तुल्ययोगिता।
प्रस्तुतानां यथा। भद्रासनाध्यासिनी वीररुद्दे तत्कीर्तयस्तद्दिग्वधूदंगना त्र्व। अन्वारतभ्रांतिविशेषभाजः प्रतिक्षणं
पांडुरतां भजंते। अत्र कीर्तीनां दिग्वधूदंगनानां च प्रकृतिरिणीकत्वे पांडुरतां भजंतीति समानधर्मः॥ अत्राकरणिका
नां यथा। कर्मेंदुपन्नगाधीशहरिकरिकुलाद्रयः। जितैर्निस्सारतां प्राप्ता काकतींद्रे महीभृति। अत्र कूर्मेंदुप्र
भृतीनां प्रकरणिकत्वं॥ निस्सारतां प्राप्त इति समानधर्मः॥ अत्र गम्यमानौपम्यं वैवस्विकं नवास्तवं। अथ
दीपकं। प्रस्तुताप्रस्तुतानां तु सामास्ये तुल्यधर्मतः। औपम्यं गम्यते यत्र दीपकं तन्निगद्यते। यत्र प्रस्तुताप्र
स्तुतानां समस्तानामेव समानधर्मसंबंधे नौपगम्यं गम्यते तद्दीपकं। तस्य धर्मस्यादिमध्यांतगत्वेन
त्रैविध्यं॥ आदिदीपकं यथा॥ भाइन लेनक प्रजुमर उलदि वेन सोरिण तेलदा वारो न कज णो णाकलिजुग्ग्रे
वीररुद्देण। तवजनिनातपो जन्यनाधर्मराजेन। अत्र नलरामधर्मपुत्रैः कृतत्रेताद्वापराः शोभंते। तथा
वीररुद्देण कलियुगं शोभत इति औपम्यं गम्यते। मध्यमदीपकं यथा॥ भाइरणी एकुलणिहिरे भद्दयोन्द वर
पुणी मां चंदो। संतिएक मलस भवो कीतिघ्ध जवरुदेवि संतिए लुस। अत्र भागीरथ्या दिनिस्समुद्राद
यो यथा। तथा कीर्तिप्रतापरुद्रराजतनस्यौपम्यं गम्यते॥ अन्तदीपकं यथा। सुरलोसुरणाभो नरलोअ
वीररुद्द नरणाहो फणिलो अपत्तिणाहो रं खइ णिरूपं दक्योच्च॥ यथा सुरलोक फणिलोको सुरनाथ फणि
नाथाभ्यां रक्षितो तथा रुद्रेण नरलोको रक्षित इत्यौपम्यं गम्यते। अथ पदार्थगतालंकारद्वयानंतरं वाक्या

र्थगतमलंकारद्वयमुच्यते। यत्र सामान्यनिर्देशः पृथग्वाक्यद्वये यदि। गम्यौपम्याश्रिता सा स्यात्प्रतिवस्तू
पमा मता॥ यत्र वस्तुप्रतिवस्तुभावेन सामान्यं वाक्यद्वये निर्दिश्यते। तेन गम्यौपम्या प्रतिवस्तूपमा
मता। साधर्म्यवैधर्म्याभ्यां द्विविधा। प्रथमा यथा। मंथानाचल एवैकः क्षमः सिंधुविलोडने। प्रताप
रुद्र एवैकः शक्तः शत्रुविलोडने। यथा समुद्रविलोडने मंथानाचलः समस्तथा शत्रुविलोडने प्रता
परुद्र एवैकः पटीयान् जनरंजने। चंद्रादृते समो नान्यश्चकोरपरितोषणे। अत्र यथा चंद्रेण चकोर
परितोषक्रिया तेन तथा वीररुद्रेण जनरंजनक्रियेति वैधर्म्येणौपम्यं गम्यते। यत्र वाक्यद्वये बिंब
प्रतिबिंबतयोच्यते। सामान्यधर्मो वाक्यज्ञैस्स दृष्टांतो निगद्यते॥ यत्र बिंबप्रतिबिंबभावेन सामान्यं
वाक्यद्वये निर्दिश्यते स दृष्टांतालंकार उच्यते॥ सोपि साधर्म्यवैधर्म्याभ्यां द्विविधः॥ आद्यो यथा। सोपि
विश्रांतिभृतः कृतिष्वये कापि प्रतिष्ठां पुनः स्वर्णाद्रेर्दिगिशावासनगरीसंदिग्धकुंजश्रियः। राजानो ज
नरंजनविदः सत्यां श्रीवीररुद्रप्रभोः कोप्यन्यो महिमा जगत्त्रयधुराधौरेयशैलाश्लिनः॥ अत्र प्रता
परुद्रस्य मेरोश्च बिंबप्रतिबिंबभावादौपम्यं गम्यते॥ वैधर्म्येण यथा। काकतीन्द्रकृपादृष्टिमात्राज्ञा
प्रतिसंपदः। तावदब्जानि नो भांति यावन्नोदेति भानुमान्॥ यथा तस्य उदयमात्रेण पद्मानि समुन्मी
लंति तथा प्रतापरुद्रदयावलोकनमात्रेण संपदः संभवंतीति वैधर्म्येण बिंबप्रतिबिंबने। अथ ग
म्यमानौपम्यप्रस्तावान्निदर्शनालंकारो निरूप्यते। असंभवद्धर्मयोगादुपमानोपमेययोः। प्रतिबिं
बक्रियागम्या यत्र सा स्यान्निदर्शना। यत्रोपमानधर्मस्योपमेयगतत्वेन निबद्धस्यान्वयासंभवात्तत्स

वंधार्थे प्रतिबिंबकरणमाक्षिप्यते। साप्येका निदर्शना। तद्विपर्यये द्वितीया। रिपुतिमिरमुदस्यन्नेनसिंहासनस्य
त्रिभुवनमहनीयः कांतीयस्तितीव्रः॥ वहति महिमबिंबोल्लाससतीसा महिस्त्यामुदयशिखरिचूडाचुंबित
स्त्रीधुमानोः॥ अत्र तीव्रभानोरनिरुक्तायाः प्रकृते संपत्तावभिरुक्तासदृशीमहीरुच्यं वहतीति प्रतिबिंबक
रणाक्षेपः॥ उपमेयधर्मस्योपमाने ऽसंभवाद्यथा। वीरस्तु नरेंद्रस्य यशो वैसद्यसंपदः। लक्ष्यंते क्षीरवा
राशि लीला दर्पणमंडले। अत्र यशो वैसद्यस्य दुग्धाब्धेः संभवात्तत्सादृश्यापगमेन बिंबप्रतिबिंबगम्य
ते॥ क्वचिन्निषेधवशादार्थिकत्वात्प्राप्त्या बिंबप्रतिबिंबकरणाक्षेपो यथा। काकतींद्र दिवलांता यावंध्यः प्र
तिकाननं॥ पद्माभ्यां मुंचन्सलक्ष्मीभ्यां स्वलीलतो सलक्ष्मियं। अत्र विमुंचन्तीति निषेधोऽसुवरतो सलक्ष्मी
प्राप्तिरासिन्ना॥ ॥ नेदप्रधानसाधर्म्यमुपमानोपमेययोः॥ आधिक्याल्पत्वकथनाद्व्यतिरेकः स उच्यते।
यत्रोपमानादुपमेयस्याधिक्येन वा न्यूनत्वेन प्रतिपादनेन प्रधानं साधर्म्यमुपगम्यते स व्यतिरेकालंका
रः॥ दिनकृतिकुमुदेश्वत्तो नरागश्माणिनिपरा त्रिपरं सहोरुहाणी। कुवलयकमलादुतप्रकाशः प्रस्तव
तिविश्वसुहृत्प्रतापरुद्रः। अत्र रविशशिनोरसंपत्त्वेन सर्वप्रियंकरत्वेनोपमेयस्य तस्य प्रतापरुद्रस्याधि
क्यं। कुवलयकमलादूतप्रकाशः इति श्लेषसमुत्थापितो व्यतिरेकः। अथ श्लेषालंकारो निरूप्यते। प्रकृ
ताप्रकृतोऽन्यगतं मुख्यं चेत्स्मरान्नमात्र साधर्म्यं। श्लेषोऽयं। श्लिष्टत्वसर्वत्राद्येद्वयेनाते॥ यत्र केवलप्रकृत
योः केवलाप्रकृतयोः श्लेषः कथ्यते। तत्र प्रकारद्वये विशेषणविशेष्यश्लिष्टता। प्रकृताप्रकृतविषये तु
केदे विशेषणमात्रश्लिष्टता। विशेष्ययोरपि श्लिष्टत्वे शब्दशक्तिमूलध्वनिप्रसंगात्। केवलप्रकृतयोः केव

लविद्गतयोश्च एकशब्दगोचरत्वेन ध्वनिशंकातत्रार्थप्रतिपादनेऽप्रस्तुतत्वेन प्रस्तुतत्वेन वा वैषम्याभावादभि
धेयसमर्थाप्रस्तुताप्रस्तुतविषयेतु अभिधायाः प्रस्तुतेकपरत्वेनतत्वात् अप्रस्तुतार्थप्रतिपत्तिर्व्यंजनयैव।
तथाचोक्तं काव्यप्रकाशे। अनेकार्थस्य शब्दस्य वाचकत्वे नियंत्रिते। संयोगाद्यैरवाच्यार्थधीकृद्व्यापृतिरंज
ननिति तदेवं त्रिविधश्लेषः।। न च केवलप्राकरणिकयोर्यथा। सदृशःकाकृतीं ज्ञेयं महाकुलमहीभृतां।। द्विरे
फहीतसन्मार्गस्फुरत्कटकसंपदां।। अत्र महाकुलानां हरिश्चंद्रप्रभृतीनां कुलपर्वतानां च उपमानत्वेना
प्राकरणिकत्वं।। प्राकरणिकाप्राकरणिकयोर्यथा।। विलसितारिपुरो भवतो विलसत्सर्वमंगलं। राजमौलि
प्रतापांगर ज्ञोरुद्र इव स्थितः।। अत्र प्रतापरुद्ररुद्रयोः प्राकरणिकाप्राकरणिकत्वं विशेषणमूलवैचित्र्य
मूलत्वात्। उपपतिकूर उच्यते। यत्राभिप्रायगर्भोस्याद्विशेषणपरंपरा।। तत्राभिप्राय विदुषामस्तोपरिकरो
मतः।। यत्र विशेषणानि साभिप्रायाणि निबध्यंते स परिकरालंकारः।। यथा।। अरात्जोत्सादवंशपार्थिवम
णेः ऋत्यात्क्रोधभिन्नपक्षगलुंगतरंगसैन्यमहत्तोमानैकवित्तस्य च। सद्योरुद्रनरेंद्रनायकचमूनाथे
न केनाप्यधोसि त्वस्याचरित्तानिसेवनपत्तेर्ज्ञो नातिसागो त्तमी।। अत्र राजरुद्रस्यैवमादि विशेषणानि
उत्साहगर्भाणि।। ।। अथाक्षेपालंकारः।। विशेषबोधायोक्तस्य वक्ष्यमाणस्य वा भवेत्। निषेधाभासकथ
नमाक्षेपः स उदाहृतः।। यत्र विशेषणप्रतिपत्त्यर्थमुक्तवक्ष्यमाणयोः प्राकरणिकयो निषेधाभासः कथ्यते
स आक्षेपः।। उक्तविषये वस्तुवा कथनं वा निषिध्यते वक्ष्यमाणविषये कथनमेव निषिध्यते तत्रापि सा
मान्यरूपेण निषेधः।। अंशोक्तावंशांतरस्य निषेधः।। एवं चतुर्विधोयमाक्षेपः।। क्रमेणा यथा।। नरेंद्रम

लेन वयं तव संदेशहारिणः। जगत्कुटुंबिनः कश्चिन्न शत्रुरिति कथ्यते॥ अत्र राजसंधिविग्रहकारिणामुक्तौ
न वयं संदेशहारिण इति यत्तु निषेधः। स चानुपपद्यमानः संधिविग्रहकालोचितकैतववचनपरिहारेण
तत्त्ववादित्वपर्यवसितः सर्वं जगदात्मकस्य तव शत्रुभावेन नावलोकनीया राजानः किंतु भृत्यरूपेण संरक्षणीया
इत्यादि विशेषमाक्षिपति। कथननिषेधो यथा। वयमशरणा इत्येयोक्तिः कथं च दृते जगति त्वय्यशरणत्राणपरे त्रायस्वास्मानि
ति स्फुटमसत्ता। सकलजनतारक्षादक्षे त्वयि प्रण। इति त्रिभुवननमस्कार्यसिद्धप्रतापमहीपते। अत्र वयमशर
णा इत्येवमादुक्तिकथननिषेधाभासरूपाद् वक्ष्यपालनीयत्वादि विशेषः प्रतीयते। वक्ष्यमाणविषये सामान्यप्रति
ज्ञया विशेषकथननिषेधो यथा। विज्ञापयामस्ते किंचित् काकतीयकुलोद्वह। विज्ञाप्यते किमथवा सर्वज्ञे रक्षके त्व
यि। विज्ञापयाम इति सामान्यप्रतिज्ञया विशेषकथननिषेधाभासात् सर्वथा वयं रक्षणीया इति विशेष आक्षिप्यते।
उक्तोक्तावक्तुं तस्य निषेधो यथा॥ प्रतापरुद्र इत्ययं सिद्धतेजा देवं च तद्विक्रमदत्तहस्तं युयं च तल्लोपमसारभाज
स्तद्युक्तमेव यदि वा विमुक्ते॥ अत्र प्रतापरुद्रनाम ह्रीयालुत्वमस्यादयं शोभा यदि वा विमुक्तेरिष्यतां तन्निषेधा
भासेन सर्वथा प्रणामैः प्रसादनीयं न प्रातिपक्ष्यमवलंबनीयं युष्माभिरिति शत्रुस्त्रीवचनभंग्या विशेष आक्षिप्यते।
अनिष्टविध्याभासोऽपि आक्षेप इत्युपगम्यते। यथा चेष्टनिषेधस्यानुपपद्यमानतया आभासत्वं॥ तथाऽनि
ष्टविषयेऽप्यनुपपद्यमानतया आभासत्वं। यथा। नाथ प्रतापरुद्रस्य सेवां त्यज लक्ष्मीं चेत्त्यज। अरण्यगृह
मेधिन्या रीतिरभ्यस्यते मया। तत्रानिष्टभूतं प्रतापरुद्रपादसेवात्यजनं तद्रिपुकामिन्या विधीयते। स वि
धिरनुपपद्यमानत्वा आभासे पर्यवस्यति। अरण्यगृहमेधिन्या रीति निरभ्यस्यत इति। अनेन विध्याभास एव।
उपबृंहितः॥ अथ गम्यप्रतावाच्या जो कुनिरूप्यते। निंदया वा स्तुत्या यत्र स्तुतिरेवावगम्यते। निंदा व्याज

स्तुतिरसौ मता। यत्र निंदाकथनमुखेन स्तुतिर्गम्यते एका सा। यत्र स्तुतिमुखेन निंदा प्रतीतिः सा द्वितीया व्याज
स्तुतिः। यथाक्रमेण। काकतीयविभोः कीर्त्या कोवाधाधवलीकृतं। यत्त्वदीयारिवक्त्रेषु दृश्यते कालिमा म
हान्। स्तुत्यानिंद्यथा। प्रतापरुद्रनृपते रहो सा हसिका द्विषः। यद्दिशाम्युदधीन्दोलानारोहंति समंततः।
अथ गम्यप्रस्तावादप्रस्तुतप्रशंसोच्यते। अप्रस्तुतस्य कथनात्प्रस्तुतं यत्र गम्यते। अप्रस्तुतप्रशंसे
यं सारूप्यादिनियंत्रिता। यत्र सारूप्येण सामान्यविशेषभावेन कार्यकारणभावेन वा प्रस्तुतकथनात्प्रस्तु
त प्रतीतिस्तत्राप्रस्तुतप्रशंसा। अप्रस्तुतात्प्रस्तुतप्रतीतिरित्यनेन समासोक्तिव्यावृत्तिः। न च कार्यात्कारण
प्रतीतावनुमानांतर्भावशंका। अनुमानालंकारे प्रसाध्यप्रसाधकयोर्द्वयोरपि प्राकरणिकाभ्युपगमात्।
अनेन पर्यायोक्तेर्व्यावृत्तिरपि। न चायं ध्वनिः। प्रतीयमानस्य वाच्यासिद्ध्यंगत्वात्। तत्र सारूप्येण यथा
आशास्तु प्रशमिलवासनोदयेभ्यः किं लब्धं भ्रमरगणैर्जरत्तरुभ्यः। फुल्लेनेन वनवसोरसप्रसन्नैरामोदिद्रु
तिनिवासमारभध्वं। अत्र भ्रमरवृत्तांतेन सर्वानसंपूर्णविभवाननुवर्तचरान्विहाय सकलगुणपरिपू
र्णः सर्वजनानंदी प्रतापरुद्र एक एव सर्वेषां विदुषां सेव्य इति प्रस्तुतं प्रतीयते। सामान्याद्विशेषप्रतीति
र्यथा। पद्मास्विनीपक्षपातवस्य सृष्टिरुत्पादयित्री नृपशेखराणां॥ तस्यात्कमलालालनभाग्यभाजो जाल
श्रियामध्यम लोक एषः। अत्र प्रतापरुद्रस्य गुणगणमहत्त्वे प्रस्तुते सामान्यमभिहितं। विशेषात्सामा
न्यप्रतीतिर्यथा। इं दुमनाविनपेंतुदुण भणारूपं हंसकोद्दहं लोवि। पंमस्तुजत्विणत्विपइ वणिजाए कि
रिसिरिं। अत्र मुग्धानां संगमं महती लक्ष्मीति सामान्ये प्रस्तुते विशेषोऽभिहितः। कार्यात्कारणप्रती

तिर्यथा॥ गाधार्द्रवार्णवा जाता नीरं चाद्रवमहाद्रयः॥ महीमवसरत्यस्मिन्काकतीयकुलेश्वरे॥ अत्रार्णवादीनां गा
धत्वादिभिः कार्यभूतैरप्रस्तुतैः कारणभूतं प्रतापरुद्रस्यागमं शौर्यादि प्रतीयते॥ कारणात्कार्यप्रतीतिर्यथा॥ प्रताप
रुद्रनृपतेर्धर्मि श्रीकल्पद्रुमादिनः॥ जातामप्यिद्रूपाद्दृष्टिः किंवा विस्मयसे सखे॥ अथ कथमीदृशी महाभोज
नमधुना भवसीति कार्यं पृच्छते॥ सविस्मयाप्यसुहृदे कारणभूता प्रतापरुद्रदृष्टिरभिहिता॥ वाच्यस्य संभवा
संभवोभयरूपतया यथासंभवं भेदाः स्वयं दृष्टव्याः॥ गम्यस्य प्रस्तावात्सर्वथोक्तमुच्यते॥ कारणं गम्यते य
त्र प्रस्तुतात्कार्यवर्णनात्॥ प्रस्तुतत्वेन संबद्धं तत्सर्वथोक्तमुच्यते॥ अप्रस्तुतस्यैव कार्यस्य वर्णनात्प्रस्तुतमे
व कारणं गम्यते तत्सर्वथोक्तं यथा॥ प्रतिभूपालमुद्यानदीर्घिकास्वाजिधूसराः॥ प्रक्षालयंति गात्राणि का
कतीयचमूचराः॥ अत्र रिपुनगरीदीर्घिकावगाहविहारेण प्रतापरुद्रचमूचरकर्तृकेन कार्यभूतेन समर
प्रांगणे वस्त्रपुराणि विहाय पलायिता॥ प्रतिनृपा इति कारणं प्रतीयते॥ अथ प्रतीपः॥ आक्षेप उपमाने
स्य कैमर्थ्येन कल्प्यते॥ यद्वोपमेयभावः स्यात्तत्प्रतीपमुदाहृतं॥ यत्रोपमेयस्य लोकोत्तरत्वात् उपमाना
क्षेपः क्रियते तदेकं प्रतीपं॥ यत्रोपमेयस्य उपमानत्वं कल्प्यते तद्द्वितीयं॥ आद्यं यथा॥ कीर्त्तौ प्रतापरुद्रस्य
विलसंत्यां दिगंतरे॥ किमर्थमुदयत्येष निर्लज्जः शशलांछनः॥ काकतीयकुलेलक्ष्मीपतिरिव न संशयः॥
अनेन कथमस्य हेतुमेरुरुपमीयते॥ अथ तर्कमूलालंकाराः कथ्यंते॥ साध्यसाधननिर्देशात्त्वनुमान
मुदीर्यते॥ रूपकहेतुकत्वेन कोदनुमानवैलक्षण्यं॥ यथा॥ रजोधूमस्सेनाव्यतिकरभवो यत्प्रसरति स्फु
लिंगा दृश्यंते भटघटितकौक्षेयकभुवः॥ ततो मन्ये यात्रामुचितसमयजां रुद्रनृपतेः प्रवृत्तः कोपाग्नि

ईदृतिरिपुक्ष्मापालनगरी॥ अथ काव्यलिंगं॥ यथा॥ प्रतापरुद्र इत्येषा कापि पंचाक्षरी शुभा॥ हरिदंतां विजितो भूपा
वशीकुर्वेति संपदः॥ अत्र वाक्यार्थगतो हेतुः॥ पदार्थगतो यथा॥ म्लानापि भवतां फाललिपिरुल्लसिता पुनः॥
प्रतापरुद्रदेवांघ्रिनखजोत्स्नामृतोक्षिताः॥ अत्र पूर्वं परिम्लानायाः क्ष्मापालफाललिपेः पुनरुल्लासे प्रतापरुद्र
चरणनखचंद्रिकासेचना हेतुस्तस्य विशेषणगतत्वात् पदार्थगतता॥ अथार्थान्तरन्यासः॥ कार्यकार
णसामान्यविशेषाणां परस्परं॥ समर्थनं यत्र सोऽर्थान्तरन्यास उदाहृतः॥ यत्र कार्यकारणभावेन सामान्य
विशेषभावेन वा प्रकृतसमर्थनं क्रियते सोऽर्थान्तरन्यासः॥ कार्यकारणभावेन यथा॥ भूपाः प्रतापरुद्रस्य
नतास्तत्वतोन्नताः॥ उन्नतानां नमयत्येष नतानुन्नमयत्यपि॥ अत्र फलरूपेणोन्नत्येन नमस्त्वंका
रणं समर्थितं॥ सामान्याद्विशेषसमर्थनं यथा॥ उद्दंजिता रुद्रनरेन्द्रस्य रणप्रसंगे प्रतिपक्षभूपाः॥ वि
भ्यत्यभीच्चित्रमचेतनेभ्यो भीतस्य सर्वं भयकृन्निनं॥ अत्र भीतस्य सर्वं भयकारि इति सामान्येन चेतनेभ्यो
रिपुभूपाला बिभ्यतीति विशेषं समर्थयति॥ विशेषात्सामान्यसमर्थनं यथा॥ दृष्टा हि महतां संगाद् द्रवत्ये
व हि सज्जनः॥ प्रतापरुद्रमभ्येत्य कलिः कृतयुगायते॥ अत्र प्रतापरुद्रसंगमहिम्ना कलिः कृतयुग
सदृश इति विशेषात् सामान्यसमर्थनं॥ कार्यकारणभावेऽपि कारणात् कार्यसमर्थनं काव्यलिंगमेतत्फलामिति त
न्नोक्तं॥ अलं प्रकारत्रयमर्थान्तरन्यासस्य॥ तर्कन्यायमूलालंकारानंतरं वाक्यन्यायमूलालंकारा उच्यं
ते॥ उद्दिष्टानां पदार्थानां पूर्वं पश्चाद्यथाक्रमं॥ अनुद्देशो भवेद्यत्र तद्यथासंख्यमिष्यते॥ यत्र येन क्रमेण
निर्दिष्टाः पदार्थास्तेनैव क्रमेण निर्दिश्यते तत्र यथासंख्यालंकारः॥ यथा॥ गांभीर्येणोन्नत्यमनर्गलं प्रता

परद्देसमवेक्ष्य जाता॥ अंभोनिधिघटिद्युदिग्गजेषु स्थैर्य प्रयासेक म मंस्त॥ अथार्थापत्तिः॥ एकस्य वस्तुनो भावाद
त्रवस्त्वन्यदापतत्॥ कैमुत्यन्यायतस्सास्यादर्थापत्तिरलंक्रिया॥ यत्र कस्यचिदर्थस्य निष्पत्तौ समानन्यायात् कैमु
त्येनार्थांतरमापत्तिः सोर्थापत्त्यलंकारः॥ न चात्रानुमानशंका॥ कैमुत्यन्यायसंबद्धरूपत्वात्॥ यथा॥ समंतादु
द्वेविविधहयदिकूलकल्लोलैर्जगत्याक्रामन्त्य जाने विधुरस्ते वनपतिः॥ नो अध्योदं वंद कुटिकुटिले रुद्रन्र
पतौ नृपानन्येषां विपदि लितरुषां के वगणना॥ त्रैलोक्यसारोपि सुवर्णशैलः प्रतापरुद्रेपानुल्यं॥ तुलास
मारोढुमपर्ण एव महो भृतां का प्रणनेतरेषां॥ अत्र प्रतापरुद्रापेक्षया मेरावप्यसारेऽन्येषां महीभृतामर्थाद
सारत्वं कैमुत्यादापतति॥ अथ परिसंख्या॥ एकस्य वस्तुनः प्राप्तावनेकत्र कदा यदि॥ एकत्र नियमस्स्याद्धि परि
संख्या निगद्यते॥ यदेक वस्तु युगपदनेकत्र संभाव्यमानमेकत्रैव नियम्यते सा परिसंख्या प्रथमा द्विविधा
प्रश्नपूर्विका तदन्यथा चेति॥ तयोर्द्वयोर्वर्जनीयस्य शाब्दत्वार्थत्वाभ्यां द्वैविध्यं चातुर्विध्यं॥ तत्र शाब्दवर्जनीया प्र
श्नपूर्विका यथा॥ किं मंडनं त्रिलोक्याः का कतितिलकौ नभावकस्मिति भन्नः स्तोतव्यः कः सुधियां रुद्रनरेंद्रो न मंदा
रः॥ अर्थवर्जनीया प्रश्नपूर्वा यथा॥ किं वा सोम वितानं लोकानां कारणीय कुलकीर्तिः॥ किं सोख्यं वसुमस्या
रुद्रनरेंद्रस्य भुजावासः॥ अप्रश्नपूर्विका शाब्दवर्जनीया यथा॥ रागो धर्मे न विषयसुखे संगतिः सत्सदस्यो
नास्तिमोक्षो असन मनिशं नीतिशास्त्रे न चाप्ते॥ कीर्त्यो लिप्सा जनचतुर ज्ञानार्थे जाते विनोदो विद्याभ्यासेन चप
रिजने रुद्रदेवस्य राज्ञि॥ अर्थवर्जनीया अप्रश्नपूर्वा यथा॥ भूरेव भुवनं देवः स्वयंभूरेव पार्थिवः॥ प्रतापरु
द्र एवैक शीलेशा नगरी शुभा॥ राज्ञि रुद्रनरेंद्र नराधीशो रत्नके जित विद्विषि॥ बलि सद्मन्यभिभवं त्रिदिवे

गोत्रभित्कृपा॥ अलंकारस्यान्यश्लेषेणव्याजस्तुतिरियायः॥ उत्तरात्प्रश्नउन्नेयो यत्र प्रश्नोत्तरे तथा॥ बहुधा चनि-
बध्येते तदुत्तरमुदीर्यते॥ यत्रोत्तरान्निबध्यमानात्प्रश्नउन्नीयते तदेकमुत्तरं चारु सार्थं॥ असकृत्तल्लोको-
त्तरं प्रश्नप्रतिपादनपूर्वकमुत्तरं॥ क्रमेण यथा॥ किमनघ व्युत्पत्तिस्तव सुजनलोकेष्वपहृतो यदज्ञानव्यं-
प्रभवति यदा रुद्रनृपतिः तदारभ्योद्यत्पार्थजयति विग्रहो धर्मविभवो महीदेवाश्रेष्ठा द्विविधविभवारंजमु-
दितः॥ अत्र प्रतापरुद्रो यदा प्रभवति तदारभ्य धर्मप्रतिष्ठा दर्णाम ही देवा अपि तस्यो विधसंतोषभाज.
किमघमभूनाप्रसिद्धस्तरात्प्रतापरुद्रराज्ये किं धर्मपरिपालनमस्ति किंसुखिनो भूसुरा इति प्रश्नउ-
न्नीयते॥ द्वितीयो यथा॥ काप्यवज्ञा कुलवींजाकोलाहो संजव्योणास्त हवासाः॥ कृष्णा अरे रंकुस्तिलाकोर-
प्रो वीररुद्रनरनाहो॥ वाक्यन्यायप्रस्तावादिह कल्प्य उच्यते॥ विरोधे तुल्यबलयोर्विकल्पालंकृतिर्म-
ता॥ यत्र तुल्यप्रमाणानुदिष्टयोर्युगपत्प्राप्तौ विकल्पः॥ औपम्यगर्भत्वाच्चारुत्वं॥ यथा॥ कपालैः क्रि-
यतां मस्तो धनुषो वापि नम्रता॥ पादच्छायाबनाथस्य विंध्यादेर्वा निषेव्यताम्॥ अत्र प्रतापरुद्रे प्रभ-
वति राज्ञां संधिविग्रहवाक्याभ्यां तुल्यप्रमाणाभ्यां शिरोनमननयननमने युगपदेव प्राप्ते विरुध्ययो-
र्यौगपद्यासंभवे विकल्पः॥ विकल्पप्रतिपक्षत्वेन समुच्चयो निरूप्यते॥ गुणक्रियायौगपद्यं समुच्चय उदा-
हृतः॥ यत्र गुणानां हेत्वादीनां क्रियाणां क्रियागुणानां च युगपद्वस्थानं समुच्चयालंकारः॥ यथा॥
प्रतापरुद्रनृपतौ भद्रासनमुपेयुषि॥ सतां प्रसन्नं हृदयमसतां कलुषं मनः॥ क्रियासमुच्चयो यथा॥ पं-
चसु क्रमेण सीसे वक्खिसइ मज्झगलउमाणे॥ जं पुणइ माणे अस्सुणंकए दंइव हसेहि प्पाओ॥ एतैहि भिन्न

विषयत्वे उदाहरणे॥ एकविषयत्वे यथा॥ त्रैलोक्यत्रयमाणकीर्त्तिमहितश्रीरुद्रप्रभोः॥ सेवा यैश्चिरमस्त काकतिपुरे
नृपेषु तद्योषितः॥ द्वारंयांतिविलोकयंतिपुरतोनिश्वाससमानेनचते मुष्यंतिप्रलपंतियांतितनुतांमुह्यंतिमूर्छंति
च॥ गुणक्रियासाम्यास्येन यथा॥ देवेकाकतिवीररुद्रनृपतौ जैत्रप्रयाणोन्मुखे माद्यद्दन्तियतत्सदाति विच
लद्वाजिप्रधावद्रथं॥ विद्वत्स्थाननमाकुला क्ष्मासुद्दयनक्षार्ण्णवमाविर्भवमकंपं भ्राम्यतिसर्वतः प्रतिवनंप्र
त्यर्थिभूभृद्गणः॥ खलेकपोतन्यायेन बहूनां कार्यसाधने॥ कारणानां समुद्योगः सद्वितीयः समुच्चयः॥
यत्रैकं कार्यं साधयितुं महामहमिकया बहूनां कारणानामुद्यमस्सोपि समुच्चय एव॥ युगपद्गुणक्रियावस्था
नाद्यथा॥ शुभ्रयशस्त्रोर्यमहत्त्वं विधानवेद्याविमलं कुलं च॥ प्रतापरुद्रस्य नरेश्वरस्य लोकोत्तरं कीर्त्ति
मुदंचयंति॥ अत्र यशः प्रभृतीनां लोकोत्तरकीर्त्तिसंपादने प्रत्येकं हेतुत्वेपि खलेकपोतन्यायेन संरंभः॥॥
अथ समाधिरुच्यते॥ एकस्मिन्कारणे कार्यसाधने न्यसुरापतेत्॥ काकतालीयनियतस्स समाधि
रुदीर्यते॥ यत्रैकस्मिन्कारणे कार्यसाधनायां प्रवृत्ते काकतालीयतयाऽन्यत्कारणमवगम्यते कार्यं
सुकरं करोति स समाध्यलंकारः॥ यथा॥ रणांकणे रुद्रनरेंद्ररोषसमाप्यशास्त्रां विहितस्तुतीनां॥ वक्रेषु
यद्वायुवशात्सतंततिन्नणानि ते बद्धसपक्षपातः॥ अत्र प्रतापरुद्रक्रोधशान्त्युपर्थं रणांकणे प्रक्रांतस्तुती
नारातीनां वक्रेषु वायुवशात्काकतालीयतया पतितैस्तृणैः कोपशान्तिलक्षणस्य कार्यस्य सुकरत्वं॥ अथ
लोकन्यायमूलालंकारा निरूप्यंते॥ अतीतानागते यत्र प्रत्यक्षेइव लक्षिते॥ अत्यद्भुतार्थकथनाद्
भाविकं तदुदाहृतं॥ यत्राद्भुतचरितावर्णनाद्भुतभाविनोर्वस्तुनोः प्रत्यक्षायमाणत्वं भवति समा

विकल्पालंकारः ॥ न च भूतभाविनो प्रत्यक्षवदवभासो विरुद्धः ॥ अद्भुतवस्तुवर्णनया भावकानां हृदि भावनो
द्यात्तथा च भावनया पुनः पुनश्चेतसि निदर्शनात् प्रत्यक्षायमाणत्वं घटत एव ॥ यथा ॥ विकटस्य कामिनी
भावनया तस्याः प्रत्यक्षायमाणत्वं ॥ न चेयं स्वभावोक्तिः ॥ तस्या वस्तुस्वभाव यथावद्वर्णनया प्रत्यक्षाय
माणता ॥ इह त्वद्भुतत्वेन नापि रसवदाद्यलंकारः ॥ तत्र विभावानुभावानुविधानेन रसादेर्भावितत्वं न त्वद्भु
तत्वेन ॥ न चेयमुत्प्रेक्षा ॥ अतीतानागतयोः प्रत्यक्षत्वेनाध्यवसायाभावात् ॥ न चेयं भ्रांतिमदलंकार इति ॥
भावनया अभ्रांतिरूपत्वात् ॥ अलःस्वभावोक्तिर्न पर्यायमलंकारः ॥ यथा ॥ ध्वजाग्रे काकुत्स्थेंद्रस्य भाति क्रो
डाकृतिर्हरिः ॥ मर्द्धिंदुद्विवदंष्ट्राग्रे यस्यालक्ष्यत मेदिनी ॥ अत्राष्टदंष्ट्रा द्वीपयुक्ता या मेदिन्या दंष्ट्राग्रे बिंदु
रूपत्वेन ॥ अद्भुतवर्णनया तथाविधभावनायां प्रत्यक्षवत्प्रतीतिसंभवः ॥ अथ प्रत्यनीकालंकारः
प्रतिपाद्यते ॥ बलिनः प्रतिपक्षस्य प्रतीकारेऽस्तु दुष्करे ॥ यस्तदीयतिरस्कारः प्रत्यनीकं तदुच्यते ॥ यच्च
बलिनः प्रतिपक्षस्य प्रतीकारोऽसामर्थ्यात्तदीयतिरस्कारोऽभवति तत्प्रत्यनीकं यथा ॥ कौकुलीयपत्ति
क्रोर्यमहोष्मन्यचूतत्वमहिमावद्वाग्निः ॥ तद्वभीरिम्मस नाभिमतत्वं बाधते निर्द्धिमपो वहिरतः
अत्रसाद्दश्यहेतुकं तद्वीयत्वमित्यलंकारत्वे ॥ अथ व्याघातः ॥ येन यत्साधितुं वस्तु तेनैव क्रियते
न्यथा ॥ अन्येन तद्दलं कृपो व्याघात इति कथ्यते ॥ येद्वस्तु येन केचित्कर्त्रा येनकेन चित्साधने न साधि
तं तद्वस्तु तेनैव साधनेनान्येन कर्त्रा यदान्यथा क्रियते स व्याघातः ॥ यथा ॥ काकतीयाभिजातेभ्यं
याभिजाता धिकस्थितिः ॥ दोर्भ्यां कृधोदयान्नृपास्ताभ्यामनुदयान् सृजं ॥ अथ लोकन्यायमलं

लंकारान्निरूप्यते। क्रमेणैकमनेकस्मिन्नाधारे वर्त्तते यदि। एकस्मिन्नथवानेकं पर्यायालंकृतिर्मता॥।
यत्र क्रमादेकमनेकस्मिन्नाधारे वर्त्तते स एकः पर्यायः। न चात्र विशेषालंकारः। तत्रैकस्यानेकत्र युग
पद्वनेन। अत्र तु क्रमेण। यत्र क्रमादेकत्रानेकमाधेयं स द्वितीयः। न चात्र समः तत्राप्येकत्रानेकस्य
युगपद्वर्त्तनेन॥ क्रमेण यथा। दंष्ट्रायां कुहनाकिटेर्भगवतो देवस्य शौरेः पुण्यश्रामस्तकमंडलेष्वन
न्ततः पातालछलोकेशितुः। जाग्रो वै पतिशेषरस्य महतः श्रीकाकतीयप्रभोर्बाहौ विश्वधुरीणधारमहितेव द्वो
सुवामेदिनी॥ अत्रैकस्या मेदिन्याः क्रमादनेकत्र वर्त्तनं। द्वितीयो यथा। यस्मिन्नुखे निजवधसविधे नृपाणां शौ
र्यौल्व्यस्तमभवन्नभिमानगर्भोः। तेषां प्रतापनृपवीक्षणकातराणां तत्रैव दीनवचनानि समुद्भवंति। अथ
सूक्ष्मालंकारो निरूप्यते। असंलक्षितसूक्ष्मार्थप्रकाशः सूक्ष्म उच्यते। विदग्धमात्रज्ञेयार्थस्य यत्राकारेङ्गि
ताभ्यां प्रकाशनं यत्र स सूक्ष्मालंकारः। दृष्ट्वा वयस्य सीत्यादि। अथोदात्तालंकारः। तस्यापि लोकन्यायमूल
त्वेवकारणं। तदुदात्तं भवेद्यत्र समृद्धं वस्तु वर्ण्यते। यत्र महासमृद्धिशालिनो वस्तुनो वर्णनं क्रियते। तत्रो
दात्तालंकारः। यथा। रम्यानेकशिलाभिधाननगरीमासेदिवांसो बुधाः सौवर्णेषु गृहेषु रत्नखचितहा
स्तारणेषु स्थिताः। आरूढ्यां करणेदिनीषु कलहाश्रीडोलकानर्भकानामोदंते यदेव पश्यतद्रुन्यपतेस्तत्या
गलीलायितं। अथ समान्यान्यायात्परिवृत्तिर्निरूप्यते। समन्यूनाधिकानां समाधिकन्यूनैर्विनिम
यः परिवृत्तिः। समेन समपरिवृत्तिः॥ न्यूनेनाधिकपरिवृत्तिः। अधिकेन न्यूनपरिवृत्तिश्चेति। समप
रिवृत्तिर्यथा। सुधारसमुचो वा —— चोदंखा काकतिभृद्भुजे॥ जातो लभन्ते कवयः सहस्रं गंडसिंडरान्॥

अत्र वाधा सिंदुराणां च समस्तं ।। अनेनाधिकपरिवृत्तिर्यथा ।। उपायनेगवाश्वादि दत्वा सर्वेपि भूभुजः ।। प्रता
परुद्रदेवस्य लभंते सुस्थिरां कृपां ।। दीयमानस्य प्रतापरुद्रकृपा विलासितस्यैवाधिक्यं ।। अधिकेनन्यूनप
रिवृत्तिर्यथा ।। प्रतापरुद्रस्य रणे जिताः प्रत्यर्थिभूभुजः ।। दत्वाभ्रषां किरातेभ्यो लभन्ते वल्कलादिकं ।। अत्रत्य
ज्यमानाद् आभरणजालात्तजा दीयमानस्य वल्कलादेन्यूनत्वं ।। अथ कारणमालालंकारः ।। पूर्वपूर्वं प्र
तिपदा हेतुः स्यादुत्तरोत्तरं ।। ज्ञतः कारणमालाख्यमलंकरणमुच्यते ।। यदा पूर्वपूर्वं क्रमेण उत्तरं प्रतिहेतु
तां भजते स कारणमालाख्योलंकारः ।। यथा ।। विद्यया विनयो लब्धो विनयेन गुणार्जनं ।। गुणैः प्रजानु
रागश्च क्रमेणायं काकतीश्वरे ।। यत्रोत्तरोत्तरेषां स्यात् पूर्वपूर्वं प्रतिक्रमात् ।। विशेषणत्वकथनमसावेकावली
मता ।। यत्र पूर्वपूर्वं प्रतिक्रमेणोत्तरोत्तरं विशेषणत्वं भजते स एकावल्यलंकारः ।। यथा ।। प्रतापरुद्र नगरी सुज
नैरुपशोभिता ।। सुजना स्थितविभवा स्थैर्यशालिनः ।। एतत्स्थापने नोदाहरणं ।। अपोहनेनापि भवति ।। यथा ।।
न तद्राज्यं प्रजा यत्र न भवंत्यूर्जितश्रियः ।। न ताः प्रजा प्रभुर्यासां न स्वयं काकतीश्वरः ।। यदानुपूर्वपूर्वस्य संस्त
वेदुत्तरोत्तरं ।। प्रसक्तस्यापि वहं तत्तं मालादीपिकमुच्यते ।। यत्र पूर्वपूर्वस्य उत्तरोत्तरं गुणावहत्वं स मालादी
पकालंकारः ।। यथा ।। मत्यमप्यामहीं प्राप्तः काकतीं दभुजां महीं ।। भुजः प्रतापमतुलं प्रतापश्च जगत्त्र
यं ।। ।। उत्तरोत्तरमुत्कर्षः सारालंकार उच्यते ।। यथा ।। जगत्सु वसुधा भाति तस्यामेकशिलापुरी ।। काक
तीयान्वयस्तत्र तस्मिन् रुद्रनरेश्वरः ।। सकलभुवनसारं तं प्रतापरुद्रदेवं विविधीकृतवत्रिराद
स्यालंकारस्य सार इत्यन्वर्थमभिधानं ।। ।। इति विद्यानाथकृतावलंकारशास्त्रेऽर्थालंकारप्रकरणं ।। २ ।। २

अथ संसृष्टिसंकरौ निरूप्येते। यथा लौकिकालंकाराणां हिरण्मयादीनां मणिमयादीनां पृथक्सौंदर्यहेतूनां अन्यो
न्यसंबंधेन चारुत्वातिशयो दृश्यते। तथामलंकाराणां रूपकाणामपि संबंधे न सौंदर्यातिशयः प्रतीयते। स च
संबंधो द्विविधः॥ संयोगः समवायश्चेति। संयोगे तिलतंडुलन्यायः समवाये क्षीरनीरन्यायः॥ तिलतंडुल
न्यायेन संसृष्टिः। नीरक्षीरन्यायेन संकरः॥ अनयोः पृथक् चारुत्वातिशयदसंकारधुरंधरत्वं। नद्द्वा
लंकारशेषता। तत्र प्रथमं संसृष्टिर्निरूप्यते। तिलतंडुलसंश्लेषन्यायाद्यत्र परस्परं। संश्लिष्टेषु अलंकारास्सा
संसृष्टिर्निरूप्यते। यत्र तिलतंडुलन्यायेन परस्परसंबंधरूपकादयो भवन्ति सा संसृष्टिः। सा त्रिविधा।
शब्दालंकारगतत्वेनार्थालंकारगतत्वेनोभयालंकारगतत्वेन च। शब्दालंकारसंसृष्टिर्यथा। गुम
संभ्रमगंडसिंधुरधुनानिर्धूतितोवल्ललाखंगतुंगतुरंगमप्रतिभयभास्पदनस्यंदनाः॥ तीव्रारंभने
वल्गमुद्भटभटाटोपस्फुटत्तलटानिस्सीमाः प्रसरंति हृद्युत्पले जैत्रप्रधानोद्यमाः॥ अत्र श्लोकानु
प्रासवृत्त्यनुप्रासयोस्संसृष्टिः॥ अर्थालंकारसंसृष्टिर्यथा। आकृतौ दुश्चमर्यत्ते महिमानमुदन्वतः। ग्र
स्तेयाद्विबद्धध्वजिनीस्तटिनीरिव। अत्र निदर्शनोपमयोः संसृष्टिः॥ उभयसंसृष्टिर्यथा। प्रता
परुद्ररोर्दंडोमंडलाग्रेण मंडितः। दृश्यते समरे वीरैरुत्फणः फणवानिव। अत्र वृत्त्यनुप्रासोपमयो
संसृष्टिः॥ ॥ अथ संकरो निरूप्यते। क्षीरनीरन्यायाद्यत्र संबंधस्यात्परस्परं। अलंकृतीनामेतासां
संकरस्समुदाहृतः॥ यत्र नीरक्षीरन्यायेनालंकाराणां मिथः संबंधो भवति सोलंकारः। तस्यांगांगिभा
वसंदेहेन एकवाचकानुप्रवेशेन च त्रैविध्यं। तत्रांगांगिभावसंकरो यथा। नृपचंद्रे हि नगर्जितैः अ
घटाकादंबिनीसंस्तवैः लोगिभल्लुकोपरोधपदुभिः प्राव्रडिव हारा इव। इत्रुस्त्रीवदुला सुवर्षणमिसः

ध्याच अत्तापोद्यायात्राकाकतिवल्लभस्य जगतामानंदमातन्वते॥ अत्र यात्राजाड्यहरकूपमित्युपमा
लंकारेण गजघंटाकादंबिनीत्यत्र उपमा प्रसाध्यत इति सजातीययोरंगांगिभावः॥ कादंबिनीवद्घं
टेति समासाश्रयणात्॥ तोर्णीभ्रमत्कटकोपरोधे यत्र भ्रमेषमलातिशयोक्तिः॥ विजातीयसंकरो यथा॥
प्रतापरुद्रस्य कृपाणधारा प्रत्यर्थिपालेषु पतत्यमंदं॥ प्रक्षालनायैव कृतस्य यात्रा त दुर्त्तिनो दुर्लिपि
कल्मषस्य॥ अत्र प्रक्षालनायेवेत्युत्प्रेक्षया दुर्लिपिकल्मषस्येत्यत्र रूपकं प्रसाध्यते इति विजातीययो
रंगांगिभावः॥ एकवाचकानुप्रविष्टसंकरो यथा॥ विजितारिपुरोप्यसौ विलसत्सर्वमंगलः॥ भुविद्रांभुरि
वाभाति काकतीयनरेश्वरः॥ अत्र विजितारिपुर इत्युपमा॥ विलसत्सर्वमंगल इति शब्दसाम्यात् श्लेषः अत्र। शंभु
रिवेत्येकस्मिन्निवशब्देनुप्रविष्टौ॥ संदेहसंकरो यथा॥ जातः प्रतापरुद्रः काकतीयान्वयांबुधौ॥ धत्ते
जगच्चकोराणां प्रसादं ज्योत्स्निकामृतं॥ अत्र काकतीयकुलांभोधाविति यादौ रूपकोपमेययोः संदेहसंकरः॥
काकतीयान्वयांबुधिः॥ अंबुधिरिव काकतीयान्वय इति समासद्वयसंभवात्॥ न चात्र साधकं बाधकं वा प्र
माणमन्यतरस्यास्तीत्येनेकत्र पर्यवस्यति॥ साधकबाधकप्रमाणयोर्हि संदेहनिवृत्तिः॥ प्रतापरुद्रनृप
तेः पारिजातात्समुद्भवाः॥ वर्तंसयंति दीनाब्धौ मधुराः कीर्तिमंजरीः॥ अत्र कीर्त्येव मंजर्य इति रूप
कालंकारे अवतंसयंतीति साधकं प्रमाणं॥ करणे नाभेदप्रतिपत्तेः बाधकं यथा॥ काकतीयस्य निस्सार
ध्वजोदितपुविजृंभितेषु॥ व्याकुलीकृतसहोद्भूलप्रतिपक्षबलार्णवः॥ उपमितं व्याघ्रादिभिः सामान्या
प्रयोग इत्यादिना सामान्यप्रयोगस्य उपमानबाधकत्वात्॥ अतः पारिशेष्याद्रूपकालंकारः॥ एवं यथा

संभवमप्यन्येषामप्यलंकाराणां संसृष्टिसंकरौ बोध्यौ॥ तत्रतत्र प्रबंधेषु॥ इति प्रतापरुद्रयशोभूषणालंकारग्रंथसंपूर्णः॥ ॥ ५॥ ५ श्रीकृष्णार्पणमस्तु॥ ॥ ५



प्रतापरुद्रलक्षणग्रंथः
समाप्तः

X

108/15

2/132